न त्वधिगता· अत्र तत्सदृशेतत्वारोपस्य चमत्कारित्वात् वाच्यस्य रामत्वारोपस्य शब्दशक्तिमूलं प्रतीयमानं
रामेण साम्यमुत्कर्षकं· अथ कुतो रामत्वं प्राप्तमित्याकांक्षानिवर्त्तकस्य साम्यस्य वाच्यसिद्ध्यंगत्वमेव·
नापरांगत्वमिति चेन्न· जनस्थानभ्रमणादिरूपस्य साम्यस्य शब्दशक्तिमूलव्यंग्यतः प्रागेवावगतो रा
मत्वारोपरूपस्य वाच्यस्य सिद्धत्वात्· अनुरणनरूपस्य वस्तुनो वाच्यांगत्वं· यथा· आगत्य संप्रति वि

सा॰पि॰

काप्र॰ २५ योगविसंष्ठुलांगीमंभोजिनींकविदर्पितन्नियामः॥ एतांप्रसादयतिपश्यप्रशनैःप्रभातेतन्वंगिपादपतिते
२५ नसहस्ररश्मिः॥ अत्रव्यंग्योपस्थितिंविनापिसिद्धेरविकमलिनीवृत्तांतेउभयशक्तिमूलवस्तुरूपनायक
वृत्तांतारोपांगं॥ नवायमुपमाध्वनिः रूपकध्वनिर्वाकिंनस्यादितिवाच्यं॥ तथाविधवस्तुनएवकाव्यस
र्वस्वत्वेनानुभूयमानत्वात्॥ टीकाकृतस्तु॥ रसस्यापिवाच्यांगत्वेप्येतदेवतंत्रेणोदाहरणमितिवदंति
तेषामयमाशयः॥ एवंरित्यानुनयनलक्षणनायकवृत्तांततादात्म्यावगमान्निप्ररतिरूपेणरसेन॥ वा
च्यस्यरविकमलिनीवृत्तांतस्योत्कर्षणमितिरसस्यवाच्यांगतेति॥ वाच्यस्यवाक्यार्थस्यानुपपद्यमा
नस्यसिद्धिरुपपत्तिस्तस्याश्चांगंनिदानं॥ वाच्यसिद्ध्यंगं यथा॥ भ्रमिमरतिमलसहृदयतांप्रलयंमूर्छां
तमः शरीरसादं॥ मरणंचजलदभुजगजंप्रसह्यकुरुतेविषंवियोगिनीनां॥ अत्रहालाहलंव्यंग्यं॥ भुज राम
नगारोपरूपस्यवाच्यस्यसिद्धिस्तत्॥ ननुगरलस्यनव्यंग्यता॥ प्रसिद्धिवशात्सत्यपिवृष्टिप्रकरणेनद २५

५१ असुफुटंसहृदयैरपिझटित्यसंवेद्यं॰यथा॰अदृष्टेदर्शनोत्कंठादृष्टेविश्लेषभीरुता॰नादृष्टेननदृष्टेनभवता ४५

पहस्त्यादिसिद्धयाविषपदेनद्रागेवगरलोपस्थितेः॰यतःप्रकरणात्प्रसिद्धिरेवबलवती॰अन्यथानिहता
र्थविलोपःस्यात्॰प्रकरणबलादप्रसिद्धार्थस्यप्रागुपस्थितौतद्दोषस्यानवकाशादितिचेत्॰न॰यत्रप्र
सिद्धार्थोपस्थितेरनंतरमप्रसिद्धेप्रकरणादिदिकमवतरतितत्रैवतद्दोषस्यलब्धपदत्वात्प्रसि
द्धेःप्रकरणमेवबलवत्॰तथाचप्रस्तुतेप्रकरणवशाद्दुपस्थितेजलेजलदभुजंगजन्यत्वमनुपपद्य
मानंव्यंग्यपदहालाहलमादायसिद्ध्यतीतिवाक्यासिद्धंगतार्थलभ्यतेस्फुटं॰अत्रादृष्टेयथानभवसिवि
योगमयंवनोत्पद्यतेतथाकुर्याइत्यस्फुटं॰संदिग्धप्राधान्यंयथा॰हरस्तुकिंचित्परिवृत्तधैर्यश्चंद्रोद
यारंभइवांबुराशिः॰उमामुखेबिंबफलाधरोष्ठेव्यापारयामासविलोचनानि॰अत्रपरिचुंबितुमैच्छदि
तिकिंप्रतीयमानंकिंवालोचनव्यापारणंवाच्यंप्रधानमितिसंदेहः॰प्राधान्यंतुचमत्कारप्रयोजकत्व
मितिवोध्यं॰तुल्यप्राधान्यंयथा॰ब्राह्मणातिक्रमत्यागोभवतामेवभूतये॰जामदग्न्यस्तथामित्रमन्यथादु

का॰प॰
२९
26

र्मनायते॰ अत्रजामदग्न्यः सर्वेषान्क्षत्रियाणामिव रक्षसांक्षयंकरिष्यतीति व्यंग्यस्य वाच्यस्य च समं प्रा
धान्यं॰ तथाहि॰ अत्र भृत्योपदेशे मित्रत्वाभिधानं सामवाच्यं॰ उक्तरूपश्च व्यंग्यो दंडः॰ उभयोरप्युपदेश
स्यानर्थनिवारणत्वेन तुल्यता॰ काक्वाक्षिप्तं यथा॰ मथ्नामि कौरवशतं समरे न कोपाद्दुःशासनस्य
रुधिरं न पिबाम्युरस्तः॰ संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु भवतां नृपतिः पणेन॰ अत्र
मथ्नाम्येवेति व्यंग्यं गुणीभूतं॰ अयमत्र संधिः संधिश्रवणकुपितस्य भीमस्योक्तिरियं॰ तथा च
प्रतिज्ञातविरुद्धनिषेधाभिधायिषु नञ्सु काकुरियं निषेधांतरान्तेपि काक्वा भावाभावस्यावधारणे
तस्य च वाच्यसमकालं प्रतीयमानत्वेन वाच्यानिर्वाह्यत्वाद्ग्रहात् गुणीभूतत्वमेव न ध्वनित्वं॰ अत
एव काकुव्यंग्यस्य पदार्थस्थानीयत्वेनाक्षिप्तपदस्येति निष्प्रमाणियितपरं॰ ततश्च यत्र काकुतोपि विलं
बेनोपस्थितिस्तत्र ध्वनित्वमेव॰ यथोदाहृते गुरुः खेदं खिन्ने इत्यत्र॰ अत्र काकाप्रश्नस्येव स्फुटित्वान्नेपा

राम
२९

मयि न योग्यः खेदः कुरुष्व तु योग्य इत्यस्याय तः॰ अस्फुटं चमत्कारे वाच्यतुल्य निरीक्षकं यत्र व्यंग्यं ॰यथा
ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरमित्यादि॰ इत्यष्टौ गुणीभूतव्यंग्यस्य भेदाः कथिताः
एतेषां चान्योन्ययोगात् ध्वनिभेदैश्च संकरसंसृष्टिभ्यां योगात् बहवो भेदाः संभवंति॰ संकलनेनास्य ध्वने
स्त्रयो भेदाः॰ व्यंग्यस्य त्रिरूपत्वात्॰ तथाहि॰ किंचिद्वाच्यतां सहते किंचित्त्वन्यथा॰ तत्र वाच्यतासहं वस्त्व
लंकाररूपं॰ रसादिलक्षणस्त्वर्थः स्वप्नेपि न वाच्यः॰ स हि रसादिशब्देन शृंगारादिशब्देनोच्यमानोपि क
दाचिदपि न चमत्कुरुते इति यावत्॰ रसादिरित्यत्रादिपदेन भावादीनां परिग्रहः॰ चित्रभेदास्त्वलंकारनि
रूपण एव निरूपयिष्यंते॰ इदं त्ववधेयं॰ शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतं॰ गुणप्राधान्यतस्त
त्रस्थिति॰ शब्दार्थचित्रमेव॰ अस्माभिरुक्तद्वयमिति॥ ॥इतिकाव्यपरीक्षायांकाव्यभेदोनामद्वितीय
उल्लासः॥ ॥अथ दोषस्वरूपमाह॰ येषां ज्ञानाच्चमत्कारो न सम्यगुपजायते॰ सालंकारगुणेप्य

का॰प॰ २७ 27 यत्ते दोषाः परिकीर्तिताः॰ अत्र काव्ये॰ दृष्टो हि लोके सगुणोपि सालंकारोपि सदोषत्वेन ज्ञातो न तथाद्
मत्करोति तथा काव्यमपि॰ वस्तुतस्तु॰ रसापकर्षजनकज्ञानविषयत्वं दोषत्वं॰ अपकर्षस्तु रत्याद्यवच्छि
न्नचैतन्यस्य आनंदांशे लेशेन स्थितिरावरणस्य॰ यद्यपि सर्वे दोषा वाच्यवाचकयोर्द्वयोर्द्वयो
र्दोषयोरेवांतर्भवितुमर्हंति तथापि तयोरेव विषयविशेषदर्शनार्थं विभज्य पदादिदोषानाह॰ दुष्टं पदं
श्रुतिकटुच्युतसंस्कृत्यप्रयुक्तमसमर्थं॰ निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलं॰ सं
दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टं॰ अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव॰ श्रु
तिकटुपदं दुष्टं एवं सर्वत्रान्वयः॰ श्रुतिकटुत्वं च मुख्यार्थापकर्षकत्वे सति ओजोव्यंजकवर्णत्वरूपं॰
वीरादिषु दुष्टतया॰ निष्प्रसंगवारणाय सत्यंतं॰ न च प्रतिकूलवर्णेनास्यान्यथासिद्धिः॰ उपधेयसं राम
करेप्युपाधेरसांकर्यात्॰ तथा हि॰ अत्र प्रतिरूप्यतरत्वनयोर्भेदः॰ वर्णानां रसव्यंजकत्वं तत्प्रातिकूल्यं २७

ववन्त्यते· यथा· अनंगमंगलगृहापांगभंगितरंगितैः· आलिंगितःसतन्वंग्याकान्तार्थ्यंलभते
कदा· अत्रकान्तार्थ्यमिति· कान्तिसंस्कृतिव्याकरणसुत्पत्तिहीनं· असाधितियावत्· यथा· प्रज्ञा
इवांगादरविंदनाभेःशंभोर्जटाजूटतटादिवापः·सुखादिवाथ्यकृतयोविधातुः·पुराणिरीयुर्मधकजि
ह्वजिन्यः· अत्रारविंदनाभेरिति· यामगामइत्यादिवा· अत्रासाधुत्वज्ञानादन्वयवोधस्थगनमे
वदूषकतावीजं· अप्रयुक्तंयदाम्नातमप्यभियुक्तैर्निषिद्धप्रयोगं· यथा· यथायंदारुणाचारः
सर्वदैवविभाव्यते· तथामन्येदैवतोस्यपिशाचोराक्षसोथवा· अत्रदैवतशब्दोदैवतानिपुंसिवे
त्याम्नातोप्यालंकारिकैर्निषिद्धप्रयोगः· अत्राभियुक्तसमयोल्लंघनप्रयोजनाभिसंधानासुखा
र्थप्रतीतिर्मांथर्यंदूषकतावीजं· असमर्थसुपसंदानंविनाअनुशिष्टार्थावोधकं· यथा· तीर्थान्त
रेषुस्नानेनसमुपार्जितसत्क्रियः· स्करस्रोतस्विनीमेषहंतिसंप्रतिसादरं· अत्रहंतीतिगमनार्थत

का.प्र. २९ र्तीपद्यतीत्यादावुपसंदानेन गतिबोधकत्वेन तत्स्यात् वैफल्यं· गमनबोधं प्रति स्वरूपायोग्यत्वं दूषकता
बीजं· निहतार्थत्व अप्रसिद्धार्थप्रतीतिव्यवधानेनाप्रसिद्धार्थस्य शक्त्या बोधकं· सामग्रीसाद्गुण्येन प्रा
९९ गप्रसिद्धार्थप्रतिपत्तौ नायं दोषः· शक्येति विशेषणाद् अप्रसिद्धशक्यव्यंजकेनानार्थे नायं दोषः· य
था· यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन· मुग्धा साध्वसतरलाविलोकय परिचुंबिता सह
सा· अत्र शोणितपदं· अत्र रुधिरलक्षणेनार्थेनोज्वलीकृततत्स्वरूपोर्थो व्यवधीयत इति गूढार्थप्र
तीतिमांथ्येर्य दूषकताबीजं· अनुचितार्थं प्रकृतार्थविरुद्धार्थकं यथा· तपस्विभिर्या सुचिरेण लभ्यते
प्रयत्नतः सत्रिभिरिष्यते च या· प्रयांति तामाशु गतिं तपस्विनो रणाध्वमेधे पशुतामुपागताः· अत्र
अपशुपदं उपश्लोक्यमानस्य कातरतामभिव्यनक्तीत्यनुचितार्थं· निरर्थकं अर्थः प्रयोजनं प्र राम
कृतास्वादपरिपोषणं तद्रहितं· यथा· उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि· अभिवां २९

छितं प्रसिद्धमस्तु भगवति युष्मत्प्रसादेन· अत्र हि पदं· निराकांक्षत्वं दूषकतावीजं· अवाचकं संकेतविरहाद
वोधकं· असमर्थेना संकेतः लाक्षणिको नावोधकत्वमिति न तयोः प्रसंगः· यथा· अवंध्यकोप
स्य निहंतुरापदां भवंति वश्याः स्वयमेव देहिनः· अमर्षशून्येन जनस्य जंतुना न जातहार्देन न विद्विषाद
रः· अत्र जंतुपदमदार्ढ्यत्वे प्रयुक्तं तत्र च नाभिधायकं· न च तात्पर्यानुपपत्त्या लक्षणया वोधकमिद
मस्त्विति वाच्यं· यदा प्रयोजनप्रतिपिपादयिषाविरहाल्लक्षणायाः न च स्वरसतः दानथास्य विभक्तावप्यस्य
दूषणत्वात्· त्रिधेति· व्रीडाजुगुप्सा अमंगलव्यंजकत्वात्· सम्यग्वशीकरणसंपत्तिः श्रीसंलालानीतिरक्ष
तेर्लक्षतेर्लक्षतिशिश्नेन नन्वश्लीलमश्लीलं· एतदेवात्र दूषकतावीजं· क्रमेण यथा· साधनं सुमहद्यस्य
यन्नान्यस्य विलोक्यते· तस्य धीशालिनः कोन्यः सहेतारालितां भ्रुवं· मजुमंथरगतिः पयोमुचां शीकरौ
घवहनश्रमादिव· केतकीवनविहारकौतुकी वायुरे [redacted] पुरभवन्मनोभ्रुवः· पिच्च वसति महंव्रज्ञा

ता२

का॰प॰ २९ 29 मितांसहपरिवारजनेनयत्र मे॰ भवतिसपदिपावकान्वये हृदयमशेषितशोकशल्यकं॰ एष्वसाधनवायुपि
ट्वसतिशब्दाव्रीडादिर्व्यंजकाः॰ संदिग्धमिति॰ अर्थसंदेहास्पदीभूतार्थद्वयोपस्थापकं॰ यथा॰ आलिंगितस्तत्रभ
वान्संपरायेजयश्रियाश्रीः॰ परंपरांवधांकर्णीकृत्वाल्पांकुरुः॰ अत्रवंधामिति किंवंदीकृतायां किंवा
नमस्यायां प्रयुक्तमिति संदेहः॰ अत्रार्थानिश्चयएवदूषकताबीजं॰ अप्रतीतमिति॰ प्रतिप्रतिशास्त्रेइतं
ज्ञातंनप्रतीतमप्रतीतं॰ यत्किंचिच्छास्त्रपरिभावितमित्यर्थः॰ यथा॰ सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः॰ ता५
विधीयमानमप्येतन्नभवेत्कर्मवंधनं॰ अत्राशयशब्दोवासनापर्यायोयोगशास्त्रएवप्रसिद्धइति॰ विर यो६
ल्तयोगत्वेनप्रतिटित्वप्रत्यायकत्वमेवदूषकताबीजं॰ ग्राम्यमिति॰ ग्राम्योऽविदग्धस्तत्रयुक्तंग्राम्यं॰ यथा॰ राम
राकाविभावरीकांतसंक्रांतद्युतितेमुखं॰ तपनीयशिलाशोभाकटिश्चहरतेमनः॰ अत्रकटिरिति॰ श्रोणी २९
नितंवादिकमोपनागरिकं॰ कटिपदंतुअविदग्धमात्रप्रयोज्यंवक्तुरविदग्धतानुसंधानंरसस्यापकर्ष

काविलुंठनवृथोच्छूनैः किमेभिर्भुजैः। अत्रायमेव न्यक्कार इति वाच्ये तथैव न्यक्कारस्य विधेयता प्रतीतेः।
अत्र च शब्दरचनाविपरीतीकृतेति वाक्यस्यैव दोषो न वाक्यार्थस्येति। किं च। खंडवाक्यार्थबोधदशा
यामेवायं दोषो न तु महावाक्यार्थबोधदशायां तदा समूहालंबन पदस्मृतौ विधेयस्योद्देश्यस्य
च पौर्वापर्यबोधविरहात्। अतन्त्रमारकम्भवः शिवालिंगितमूर्त्तयः। विग्रहन्त्वपर्णेनाघश्चेरते
तेगतास्करवाः। अत्रन्त्वमादिगुणयुक्ताः सुखमासत इति विवक्षितेनेहतारति प्रतीतिः। अथ पदै
कदेशे यथासंभवमुदाहरणानि। अलमतिचपलत्वात्स्वप्नमायोपमत्वात्परिणतिविरसत्वात्सं
गमेनांगनायाः। इति यदि शतकृत्वस्तत्त्वमालोचयाम स्तदपि न हरिणाक्षी विस्मरत्यंतरात्मा। अत्र
त्वादिति कर्तृ। यश्चाप्सरोविभ्रममंडनानां संपादयित्री शिखरैर्विभर्त्ति बलाहकच्छेदविभक्तरागा
मकालसंध्यामिव धातुमत्तां। अत्र मत्ताशब्दः क्षीवार्थेन निहतार्थः। आदावंजनपुंजलिप्तवपुषां श्वा

का॰प॰ ३२ सानिलोल्लासितप्रोत्सर्पद्विरहानलेन च ततः संतापितानां दृशां॰ संभ्रम्येव निषेकमश्रुपयसा देवस्य चेतो
भुवो भल्लीनामिव पानकर्म कुरुते कामं कुरंगेक्षणा॰ अत्र दृशामिति निवद्धवचनमनर्थकं॰ कुरंगेक्षणया
एकस्या एवोपादानात्॰ न च व्यापारेत्र दृक्त्र्यद्वो वर्त्तते॰ अंजनलेपादीनां तत्रासंभवात्॰ अयमेकपदेत
या वियोगः प्रियया चोपनतः सुदुःसहो मे॰ नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः॰ अत्र
भवितव्यमिति भूतमित्यर्थे अवाचकं॰ अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः॰ परमा
र्थतः सहृदयं वपुः हन्ति पुनः कालकूटघटितमिव॰ अत्र पेलवशब्दः॰ यः पूयते सदा स्नात्वा सुरस्रोतस्विनी
जले॰ अस्माकं भाग्यवशतः सोयं नयनगोचरः॰ अत्र पूयशब्दः॰ विनयप्रणयैककेतनं सततं यो भवदंग एम
तादृशः॰ कथमेष सतद्वदीप्स्यतां तदभिप्रेतपदं समागतः॰ अत्र प्रेतशब्दः॰ कस्मिन्कर्मणि सामर्थ्यमस्य ३२
नोत्पद्यते तरां॰ अयं साधुवरस्तस्मादंजलिर्वध्यतामिह॰ अत्र किं पूर्वं साधुरुत साधुषु वर इति संदेहः॰ कि

मुच्यतेस्य भूपालमौलिमालामहामणेः सुदुर्लभं वचो बाणैस्तेजो यस्य विभाव्यते· अत्र वचः शब्देन गीः शब्दो ली
लक्ष्यते· अत्र पूर्वपदवदुत्तरपदमपि पर्यायपरिवर्त्तनं न सहते· जलध्यादौ तूत्तरपदमेव· प्रतिकूलवर्णं सुप
हतलुप्तविसर्गं विसंधि हतवृत्तं· न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तं· अपदस्थपदसमा
सं विमतपरार्थं प्रसिद्धिहतं· भग्नप्रक्रमममभवन्मतयोगं वाक्यमेव तथा· रसानुगुणत्वं वर्णानां व
क्ष्यते· तद्विपरीतत्वं प्रतिकूलत्वं· यथा शृंगारे· अकुंठोत्कंठया पूर्णमाकंठं कलकंठि मां· कंबुकंठ्याः
क्षणं कंठे कुरु कंठार्त्तिमुद्धर· अत्र मधुरवर्णत्वमुचितं· तथा रौद्रे· उदाहृतेन्कृत मनुमतमित्यादौ विकटव
र्णत्वं दीर्घसमासश्चमुचितं· उपहतः ओत्वं प्राप्तो लुप्तो वा विसर्गो यत्र तदुपहतलुप्तविसर्गं· यथा· धीरो
विनीतो निपुणो निर्विकारोन्नपोत्र सः· यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः· अत्रैतयोर्नैरंत
र्येणानेकस्यानो पहतलुप्तविसर्गत्वेनैव दूषकता· तथा· उपहतेत्यादिवदुत्कृष्ट पतत्प्रकर्षवद्बंधशैथिल्या

का॰प॰ पादकात्वमेवरूपकतावीजं॰संधेर्वैरूप्यंविश्लेषः॰यथा॰राजन्विभांतिभवतश्चरितानितानिइंदोर्द्युतिंदधति
३२ यानिरसातलेंतः॰श्रीदोर्वले अतितनेउवितार्थवृत्तीआततातीविजयसंपदमेत्यभातः॰अत्रसंहितांन
33 करोमीतिस्वेच्छयासकृदपिदोषः॰प्रपत्स्यादिहेतुकत्वेत्वसकृदन्तवृत्तंजातयतिभंगंरसाननुगुणंवृत्तं
यत्॰क्रमेणोदाहरणं॰अमृतममृतं कः संदेहो मधून्यपि नान्यथा मधुरमधिकंचूतस्यापिप्रसन्नरसंफ
लं॰सकृदपिपुनर्मध्यस्थःसन्रसांतरविज्ञानोवदतु यदिहान्यत्स्वादुस्यात्प्रियारदनच्छदात्॰अत्रयदि
हान्यत्स्वादुःस्यादितियतिभंगादश्रव्यं॰हान्तपहाबुधहाकविवंधोविप्रसहस्रसमा अयदेव॰मुग्धविद
ग्धेसभांतररत्नकासिगतः क्वरयंवतवैनें॰हास्यव्यंजकमेतवृत्तं॰न्यूनपदं यथा॰त्वयिनिवद्धरतेःप्रि राम
यवादिनःप्रणयभंगपराङ्मुखचेतसः॰कमपराधलवंममपश्यसित्यजसिमानिनिदासजनंयतः॰अत्रा ३२
पराधलवमपीतिवाच्यं॰अत्ररूपकतावीजंस्फुटमेव॰पराभिमतस्यानभिहितवाच्यस्यन्यूनपदएवांतर्भा

वः· अधिकपदं यथा· इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मान्मथा विकाराः· यदपि च न कृतं नि
तंबिनीनां स्तनपतनावधि जीवितं रतं वा· अत्र कृतमिति कृतं प्रस्फुतक्रमभंगमावहति· अत्राकां
क्षाविरहः स्फुट एव· स एव दूषकताबीजं· कथितपदं यथा· अधिकरतलतल्पं कल्पितस्वापली
लापरिमलननिमीलत्पांडिमा गंडपाली सुतनु कथय कस्य व्यंजयत्यंजसैव स्मरनरपतिली
लायौवराज्याभिषेकं· अत्र लीलेति· अत्र पिष्टपेषणवदचमत्कारित्वमेव दूषकताबीजं· वस्तुत
स्तु· सत्यप्यर्थभेदे तात्पर्ये पदैकत्वदोषादर्थैक्यप्रतिभास एव दूषकताबीजं· तथा च उदेति सविता ता
म्रस्ताम्र एवास्तमेतीतिवत् यास्वापलीला तत्रैव यौवराज्याभिषेकं व्यंजयतीति भेदप्रतीतिः स्यात्·
अत्र तु द्वितीयलीलापदं अवश्यपवशीकरणपरं पतत्प्रकर्षं यथा· कः कः कुत्र न घुर्घुरायितघुरीघोरो
घुरेत्सूकरः कः कः कं कमलाकरं विकमलं कर्त्तुं करी नोद्यतः· के के कानि वनान्यरण्यमहिषा नोन्म

का॰प॰ ३४ 35 लयेयुर्यतः सीहीस्नेहविलासवद्धवसतिः पंचाननो वर्त्तते॰ समाप्तपुनरात्तं॰ यत्र विशेष्यं समाप्तं जनि
तान्वयबोधं पुनरात्तमावर्त्तते॰ यथा॰ क्रेंकारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवो झंका
रो रतिमंजरीमधुलिहां लीलाचकोरीध्वनिः॰ तन्व्याः कंचुलिकापसारणभुजाक्षेपस्खलत्कंकण
क्वाणः प्रेमतनोतु वो नववयोलास्याय वेणुस्वनः॰ नचात्र क्रियाकारकभावेनान्वयबोधे जाते पुनर्वि
शेषणान्वये निराकांक्षत्वमेव दूषकताबीजं वाच्यं॰ तन्नु न घटते॰ विशेषणांशे तात्पर्यसत्वेन तात्पर्यवि
षयीभूतान्वयबोधाजननेन तद्घटिताकांक्षायाः सत्वादिति चेत्त॰ साध्ववोचः॰ किंत्वत्र तात्पर्यग्राहकस्य
कटं नास्तीति तद्ग्रहविलंबेनान्वयबोधविलंब एव दूषकताबीजं॰ यत्र तु तद्ग्राहकमस्ति तत्र नेदं दूषणं
॰यथा॰ नववयोलास्याय गीतं तथा॰ अत्र तथेत्यस्योत्कटग्राहकस्य सत्वात्॰ एवं॰ अपापि स्तनवेपथुं राम
जनयति श्वासः प्रमाणाधिकः इत्यत्र प्रमाणाधिक्ये नैव श्वासस्य वेपथुजनना क्रियान्वयेपि नवाक्य ३४

समाप्तिः एवमन्यत्रापि बोध्यं॰ अपदस्य पदमस्थानेस्य पदं॥ यथा॰ द्वयं गतं सम्प्रति शोचनीयतां समा
गमप्रार्थनया कपालिनः॰ कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॰ अ
त्र त्वंपदानन्तरं चकारो युक्तः॰ तदैव तस्याः समुच्चेयता स्यात्॰ इदमत्रावधेयं॰ अधीतरैकवाचकं
यत्र द्वितीयार्धैकवाचकशेषं प्रथमार्धगतं॰ तथा संकीर्णं॰ यत्र वाक्यान्तरपदानि वाक्यान्तरेऽनु
प्रविशन्ति तत्॰ तथा गर्भितं॰ यत्र वाक्यस्य मध्ये वाक्यान्तरमनुप्रविशति तत्॰ तथाऽक्रमं॰ य
त्र यदुत्तरं यत्पदोपादानमुचितं तदन्यत्र तदुपादानं तत्॰ एतानि वृत्तारिपरैरप्यपगता
नि दूषणानि अस्मिन्नपदस्यपद एवान्तर्भूतानि॰ संकीर्णस्य क्लिष्ट एवान्तर्भाव इति केचित्॰ अपदस्य
समासं यथा॰ अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि स्थातुं वाञ्छति मान एष धिगिति क्रोधादि
वालोहितः॰ उद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्फुल्लत्कैरवकोषनिःसरदलिश्रेणीकृपा

ऐंद्राक्षी· अत्र कुरुपस्योक्तो समासो न कृतः· कवेरुक्तौ तु कृतः· विमतः प्रकृतविरुद्धः परार्थो यत्र तद्वि
मतपरार्थं यथा· राममन्मथशरेण ताडिता दुःसहे न हृदये निशाचरी· गंधवद्रुधिरचंदनोक्षिता जी
वितेशवसतिं जगाम सा· अत्र प्रकृतरसविरुद्धः शृंगारस्य व्यंजको परोर्थः· प्रसिद्धादन्यत्र प्रयुक्तं प्र
सिद्धिपरिहीनं· यथा· महाप्रलयमारुतक्षुभितपुष्करावर्त्तकप्रचंडघनगर्जितप्रतिरवानुकारी मुहुः·
रवः श्रवणभैरवः स्थगितरोदसीकंदरः कुतोद्य समरोदधेरयमभूतपूर्वः पुरः· अत्र रवो मंडूकादि
ध्वनिषु प्रसिद्धः न तु क्रूररूपे सिंहनादे· स्फुरितवसनालंकारायां कदाचन कौमुदीमहसि सुदृशि स्वै
रं यांत्यां गतोस्तमभूद्विधुः· तदनु भवतः कीर्त्तिः केनाप्यगीयत येन सा प्रियगृहमगान्मुक्ताशंका क्व
नासि शुभप्रदः· अत्रामूर्त्तापि कीर्त्तिर्ज्योत्स्नावत्प्रकाशरूपा कथिता इति लोकविरुद्धमपि कविप्रसि
द्धेर्न दुष्टं· भग्नः प्रस्तावो यत्र तत्तथा· यथा· नाथे निशाया नियतेर्नियोगादस्तं गते हंत निशापि या

ता॰ कुलांगनानां हृदयानुरूपं नातः परं भद्रतरं समस्ति॰ अत्र गतेति प्रक्रांतेयातेति कृतेः प्रक्रमो भ
ग्नः॰ गतानिशापीति युक्तंः ननु कथितपदस्य दुष्टत्वाभिधानात्कथमेकस्य पदस्य द्विः प्रयोग इति चेत्.
उच्यते॰ उद्देश्यप्रतिनिर्देश्यव्यतिरिक्त एव विषयः एकपदद्विः प्रयोगनिषेधस्य॰ प्रत्युत तादृशि वि
षये तस्यैव पदस्य सर्वनाम्नो वा प्रयोगं विना दोषः॰ तथा हि॰ उदेति सवि ता ताम्रस्ताम्र एवास्तमेति च॰
संपत्तौ च विपत्तौ च महतामेकरूपता॰ अत्र रक्त एवेति यदि क्रियेत तत्तदा पदांतरप्रतिपादितः स एवार्थो
ऽर्थांतरतयेवभासमानो नैकरूप्यमावहति॰ ननु पर्यायशब्दानां शक्यतावच्छेदकैक्यानियमात्कथमन्य
त्वेन प्रतीतिरिति चेदुच्यते॰ यन्मते शाब्दबोधे शब्दोभासते तन्मते रक्तादिशब्दांतरस्य भानादैकरूप्यासंभ
वात्॰ अभवन्मतसंबंधो योगः संबंधो यत्र तत्तथा॰ विवक्षितसंबंधबोधं प्रति स्वरूपायोग्यमिति यावत्॰
तेन विधेयाविमर्षेनातिव्याप्तिः॰ तत्र रचनान्यत्वेन संबंधोपपत्ते॰ यथा॰ येषां ताश्चिरदशेभदानसरित॰

का॰प॰ पीताः प्रतापोष्मभिर्लीलापानकवस्त्वद्वदनतरुच्छायास्तयैः कल्पिताः । येषां ऊँ कृतामरपतिन्तो भाःन्त
३६ पावारिणां किं तैस्त्वत्परितोषकारि विहितं किं किं विस्मयवादोवितं । अत्र ये रित्यत्र विशेष्यस्याप्रतीतिः । न्तपा
36 वारिभिरितिपाठे युज्यते संबंधः । यावद्घटदर्थपरामर्षकत्वं तच्छदेन सहन्तपावारिभिरित्यस्य विशेष्यभावो
पपत्तौ सकलत्वयदर्थन्तपावारिणोरप्यभेदान्वयस्यान्याय्यत्वात् । यथा वा । जंघाकांडोरुनालो नखकि
रणलसत्केसरालीकरालः प्रत्यग्रालक्तकाभाप्रसरकिसलयो मंजुमंजीरभृंगः । भर्तुर्नृत्यानुकारे ज
यति निजतनुस्वच्छलावण्यवापीसंभूतांभोजशोभां विदधदभिनवो दंडपादो भवान्याः । अत्र दंडपादग
तानिजतनुः प्रतीयते । भवानीसंबंधिनीतु विवक्षिता । निजस्वात्मादिशब्दानां प्रधानक्रियान्वितान्वयित्व राम
मुत्पत्तेः । अर्थो पुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः । संदिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्चात्र ३६
नवीकृतः सनियमानियमविशेषो विशेषपरिवृत्तः । साकांक्षोपदमुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ।

विध्यनुवादायुक्तस्य त्यक्तपुनःस्वीकृतोश्लीलः इत्येते प्राचीनैरर्थदोषाः कथितास्ते उक्तेषु शब्ददोषेष्वंतर्भवंती
ति न पृथक्त्वनिपादिताः तथाहि पुष्टं पोषणमुत्कर्षः पश्चान्न विद्यते पुष्टं यत्रेति नञ्समासः तथा वक्रल
न वाक्योद्देश्योत्कर्षहेत्वर्थरूपापुष्टार्थस्य अधिकपदे निरर्थके वांतर्भावः ।यथा। अतिवित गगनसर
णिप्रसरणपरिमुक्तविश्रमानंदः मरुदुल्लासितसौरभकमलाकरहासकृद्रविर्जयति। अत्रातिवि
ततवादयोर्थाअपुष्टा इति युक्तोस्याधिकपदे निरर्थके वांतर्भावः तथा कष्टस्य क्लिष्टेंतर्भावः यथा
सदामध्येयासामियममृतनिस्पंदसरसा सरस्वत्युद्दामावहति बहुमार्गोपरिमलं। प्रसादं ताए
ताधनपरिचिताः केन महतां महाकाव्यव्योम्नि स्फुरितमधुरायां तु रुवयः अत्रार्थप्रतीतिर्विलंवेनेति
क्लिष्टेंतर्भावः समुचितः अस्यार्थः अश्रांतं कथाजलं वरसो माधुर्यं शृंगारादिश्च सरस्वती वाणीन
दीव मार्गोरीतिः पंथाश्च परिमलं चमत्कारं सुखं च प्रसादं स्वच्छत्वं स्वच्छकांतिश्च घनोनिविडो मेघ

का॰प॰ ३७ श्वः॰ परिचिता अत्यंताभ्यस्ताः संवत्सराश्च॰ रूढयश्च अभिसंधयः कांतयश्च॰ महतां कवीनामादित्यानां च॰ तेषां॰
शब्दशत्वात्॰ एवं रूक्त्वा निंदिता वा पुनरन्यथाकृतरूपस्य व्याहतस्य अननुचितार्थ एवांतर्भावः॰ यथा॰
२७ जगति जयिनस्ते ते भावा नवेंदुकलादयः प्रकृतिमधुराः संत्येवान्ये मनो मदयंति ये॰ मम तु यदियं याता
ता लोके विलोचनचंद्रिका नयनविषयं जन्मन्येकः स एव महोत्सवः॰ अत्रेंदुकलादयो यं प्रतिपक्षसदृशा
याः स एव चंद्रिकात्वमुत्कर्षार्थमारोपयतीति व्याहतस्यानुचितार्थं तर्भावस्तद्भवितः॰ एवं पुनरुक्तस्या
कपदे निरर्थकेवांतर्भावः॰ पुनरुक्तोदाहरणं तु हतमनुमतमित्यादि॰ अत्रार्जुनार्जुनेति भवद्भिरि
तिवोक्ते किरीटि पदार्थः पुनरुक्त इति युक्तोऽधिकपदे निरर्थकेवांतर्भावः॰ तथा दुःक्रमस्य अनुचि एम
तार्थे॰ यथा॰ भूपालरत्न निर्दैन्यप्रदानप्रथितोत्सव॰ विश्राणय तुरंगं मे मातंगं वा मदालसं॰ अत्र ३७
मातंगस्य प्राङ्गि॰ दैन्योपाप्यः इतीदमनुचितार्थं॰ एवं ग्राम्यो ग्रामसंभवोऽविदग्धप्रतिपादितः स्वरि

रंसादिः तस्याप्यनुचितार्थत्वंभावः· यथा· स्वपितियावदयंनिकटेजनः स्वपिमितावदहंकिमपैतीति· त
दयिसांप्रतमाहररूपकंत्वरितमूरुमुदंचयकुंचितं· इदमप्यनुचितार्थं· तथासंदिग्धस्यसंदिग्धएवा
तभावः· यथा· आलिंगितस्तत्रभवानित्यादि· एवंनिर्हेतोर्न्यूनपदे· यथा· गृहीतंयेनासीःपरिभवभया
न्नोचितमपिप्रभावाधस्याभून्नखलुतवकश्चिन्नविषयः· परित्यक्तंतेनत्वमसितशोकान्नखलुमयाद्वि
मोक्ष्येशस्त्रंत्वामहमपियतःस्वस्तिभवते· अत्रद्वितीयशस्त्रमोचनेहेतुर्नोपात्तः इतिन्यूनपदेत्वंभावः·
एवंप्रसिद्धिविरुद्धस्यानुचितार्थत्वंभावः· उदाहरणंतुपूर्वमेवप्रसिद्धिपरिहीनेमहाप्रलयइत्या
दिदत्तं नदेवमंतव्यं· अत्ररवः सिंहनादेनुचितइत्यनुचितार्थं· विद्याविरुद्धस्याप्यनुचितार्थत्वंभा
वः· यथा· सदास्नात्वानिशीथिन्यांसकलंवासरंबुधः· नानाविधानिशास्त्राणिव्याचष्टेचशृणोति
च· अत्रग्रहोपरागादिकंविनारात्रौस्नानंधर्मशास्त्रेनिषिद्धमितीदमप्यनुचितार्थं· एवमेकभंगीनि

का.प. दिष्टानेकार्थत्वरूपमनवीकृतत्वं न दोषः· किंतु गुणाभावः· उक्तिवैचित्र्यात्मकमाधुर्यस्यनवीकृतत्वरू
३८ पस्य गुणस्य वस्तुमात्रत्वात्· अतोत्र गुणाभावादेव रसापकर्ष इति· यथा· प्राप्ताः श्रियः सकलका
३८ मदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किं· संतर्पिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं त
नुभृतां तनुभिस्ततः किं· न त्वानियमपरिवृत्तस्यापि न्यूनपद एवांतर्भावः· नियमस्य शब्दादप्रतिपत्ति
र्नियमपरिवृत्तिः· यथा· यत्रानुल्लिखिताख्यमेव निखिलं निर्माणमेतद्विधेरुत्कर्षप्रतियोगि
कल्पनमपि न्यक्कारकोटिः परा· याताः प्राणभृतां मनोरथगतीरुल्लंघ्य यत्संपदस्तस्याभासम
णीकृताश्मसु मणेरश्मत्वमेवोचितं· अनुल्लिखिताख्यमेव निखिलं निर्माणमेतद्विधेरुत्कर्ष राम
प्रतियोगिकल्पनमपि न्यक्कारकोटिः परा· याताः प्राणभृतां मनोरथगतीरुल्लंघ्य यत्संपदस्तस्या ३८
भासमणीकृताश्मसु मणेर[illegible]श्मसु मणेरश्मत्वमेवोचितं· अनुल्लिखिताख्यमनिर्दिष्टनामकं·

अत्रछायामात्रमणीकृताश्मकमणेस्तस्याश्मनैवोचितेतिसनियमत्वंवाच्यं·तथाकृतेगुणांतरव्यवच्छे
देननिंदातिशयप्रतीतेः·प्राकृतमणेःस्फाटिकगणनायांचिंतामणेर्गणनमनुचितमित्यर्थः·कवितात्पर्यविष
यःसिध्यति·तथाऽनियमपरिच्छिन्नस्याधिकपदे·अविवक्षितनियमस्यशब्देनप्रतिपादनंअनियमपरि
वृत्तिः·यथा·वक्त्रांभोजंसरस्वत्याधिवसतिसदाशोणएवाधरस्तेबाहुःकाकुत्स्थवीर्यस्मृतिकरणप
टुर्दक्षिणस्तेसमुद्रः·वाहिन्यःपार्श्वमेताःक्षणमपिभवतोनैवमुंचंत्यभीक्ष्णंस्वच्छेंतर्मानसेस्मिन्क
थमवनिपतेतेंबुपानाभिलाषः·अत्रशोणएवेतिनियमोनवाच्यः·पिपासोर्जलमात्राभिलाषेणे
तरव्यवच्छेदस्याविवक्षितत्वात्·तथाविशेषपरिच्छिन्नस्यान्यूनपदे·यथा·श्यामांश्यामलिमानमा
नयतभोःसांद्रैर्मषीकूर्चकैर्मंत्रंतंत्रमथप्रयुज्यहरतश्वेतोत्पलानांश्रियं·चंद्रंचूर्णयतक्षणाच्चकण
शःकृत्वाशिलापट्टकेयेनद्रष्टुमहंक्षमेदशदिशस्तद्वक्त्रमुद्रांकिताः·अत्रश्यामामित्यत्रज्योत्स्नीमि

का॰प्र ३९ तिविशेषोवाच्यः॰ तथा अविशेषपरिवृत्तस्यापि न्यूनपदे॰ यथा॰ कल्लोलवेल्लितदृषत्परुषप्रहारैरत्ना
न्यमूनि मकरालय मावमंस्थाः॰ किंकौस्तुभेन विहितो भवतो न नाम याञ्चाप्रसारितकरः पुरुषो
35 त्तमोपि॰ अत्र एकेन विहितो भवतः स नामेति सामान्ये वाच्यं॰ अन्यथा विशेषस्य कौस्तुभस्योपकारि
त्वे सामान्ये शुकयमादरः स्यादिति॰ तथा साकान्तस्यापि न्यून पदे॰ अनुपात्तार्थकाकांक्षाविषयार्थ
त्वं साकांक्षत्वं॰ यथा॰ अर्थित्वे प्रकटीकृतेपि न फलप्राप्तिः प्रभोः प्रत्युत द्रुह्यन्दाशरथिर्विरुद्धच
रितो युक्तस्तया कन्यया उत्कर्षं च परस्य मानयशसोर्विस्रंसनं चात्मनः स्त्रीरत्नं च जगत्पतिर्दशमु
खो देवः कथं मृष्यति॰ अत्र स्त्रीरत्नमित्युपेक्षितुमित्याकांक्षति॰ अन्यथा स्त्रीरत्नमिति कथं त्वाद्यः॰ त रा॰म
था च स्त्रीरत्नस्य द्वेष्यायोग्यत्वे कथं। कथमित्यादिना चयः॰ ततश्च साकांक्षस्य न्यूनपदएवान्तर्भावः ३९
समुचितः॰ तथा॰ अपदयुक्तस्यानुचितार्थे॰ यथा॰ आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि

वक्तुर्नवं भक्तिर्भूतपतौ पिनाकिनि पदं दिव्ये त्रिलंकापुरी· उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो
लभ्यते स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः· अत्र स्याच्चेदेष न रावण इत्येतावतैव समा
प्यं· तथा हि· अत्र रावणं प्रत्याक्षेपेन्द्रावाक्यार्थः स्याच्चेदेष न रावण इत्यंतेनैव आप्तः क्व नु पुनरित्या
दिना समार्थनेनार्हतीत्यनुचितार्थ· एवं एकसमभिव्याहारनिर्दिष्टानामाधमरूपस्य सहचरभिन्नस्या
नुचितार्थ एवांतर्भावः· यथा· श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निशा शशांकेन धृ निम्नगा
तिः समाधिना नयेन चालं क्रियते नरेंद्रता· अत्र श्रुतिबुद्ध्यादि त्रिरुत्तमसहचरैर्व्यसनमूर्खतयो
भिन्नत्वं इतीदमप्यनुचितार्थं· तथा प्रकाशितविरुद्धस्यानुचितार्थ एवांतर्भावः· यथा· लग्नं रागा
वृतांग्या सुदृढमिह ययैवासियष्ट्यारिकंठे मातंगानामपीहोपरि परपुरुषैर्या च दृष्टा पतंती· तत्सक्तो
ऽयं न किंचिद्गणयति विदितं तेऽस्तु तेनास्मि दत्ता भृत्येभ्यः श्रीनियोगाद्गदितुमिव गतेत्यंबुधिं यस्य की

का.प त्रिः॰ अत्र विदितं ते स्त्वित्यनेन वेदयितव्यानुविताथ्याभिधानेन क्रोधाभिव्यक्तेः श्रीस्तस्मादपसरतीति
४० विरुद्धं प्रकाशयतेः रतीदमप्यनुविताथं तथा विध्यमुक्तस्य विधेयाविमर्शेन्तर्भावः॰ यथा॰ वाताहारत
५० याजगद्विषधेरेराश्चाश्यनिःशेषितं तेऽग्रस्ताः पुनरश्चनोयकणिकानीव्राघ्रतेर्वर्हिभिः॰ ते पिक्रूरवम्र
रुचर्मवसनेनीताः न्तयंल्लुब्धकेर्दनस्यस्फुरितं विदत्र पि जनो ज्ञात्मो गुणानीहते॰ अत्र जगतिनि:
शेषयितुं वाताहारत्वमावरितमित्याघर्थदंभस्यस्फुरितमित्याघर्थांतरन्यासस्वरसेनविवक्षाणी
ये विधेयस्यमुक्तमाभिधानेन विधेयायुक्तं च तथावस्फुट एव विधेयाविमर्शेन्तर्भावः॰ तथा विधेय
विरोध्यनुवादरूपस्यानुवादायुक्तस्याप्यनुविताथ एवांतर्भावः॰ यथा॰ अरेरे माहसासमरणभमल एम
श्रेणिशारणस्मरक्रीडाव्रीडाश्रमनविरहिणाणदमनः॰ सरोहंसोत्रं सप्रबलदलनीलोत्पलसखे ४०
सखेदो हं मोहं श्लथयकथयत्वेंदुवदना॰ अत्र विरहिणः स्फुरूरेव सोमोहश्लथपने विधेये विरहिणाण

दमनत्वेनानुवादो नोचित इतीदमप्यनुचितार्थं. यथा. स्पष्टकं पुनः स्वीकृतस्य समाप्तपुनरात्ते. स्पष्ट
उपसंहृतैकदेशः. यथा. लग्नं रागावृताङ्ग्येत्यत्र विदितं तेऽस्त्वित्यनेन यावतोऽर्थो विवेधानं अनिवेधे
वमध्येउपसंहाराभिधानात्. तथावात्रसमाप्तपुनरात्तं वक्त्राद्वृत्तिकल्पनमुत्याप्याकांक्षं त्वं वाहृष
कृतावीजमित्येतयोरभेदो न्याय्यः. तथाश्लीलस्यानुचितार्थे. यथा. हंतुमेव प्रवृत्तस्य स्तब्धस्य विवरै
षिणः. यथाशु जायते पातो न तथा पुनरुन्नतिः. अत्र पुंव्यंजनस्यापि प्रतीतिरितीदमप्यनुचितार्थ
नन्वेवमधिकपदादीनामपि निरर्थकादिष्वंतर्भावः स्यादिति चेत्. भवतु का नो हानिरिति. अथे
दानीमेते दोषाः क्वचिददोषाः इत्याह. कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः. संनिधानादि
बोधार्थं. यथा. तस्याः कर्णावतंसेन जितं सर्वं विभूषणं. अत्रावतंसपदेन कर्णे [illegible] भरणमु
च्यते. तथापि कर्णपदेनाधिकं. न यहि. कर्णपदेन कर्णे स्थितिरवस्याप्रतिपाद्यते. तेन वर्णनीयोत्क

का.प.
४२

र्षः श्रवणीयत्वे स्वतो न भूषणान्तरजेऽत्वमपि तु नत्कार्णसंबंधेनेति पर्यवसानात् । तथा श्रवणकुंडलशिरः
शेखरधनुर्ज्यामुक्ताहारपुष्पमालाशब्देषु श्रवणादिशब्दास्तत्र विशेषणलाभाय बोध्याः । स्थितेष्वेतत्स
५१ मर्थनं । न खलु कर्णावतंसादिपदवज्जघनकांचीत्यादि क्रियते । ख्यातेऽर्थे निर्हेतोरदुष्टता । यथा । चं
द्रं गता पद्मगुणान्न भुंक्ते पद्माश्रिता चांद्रमसीमभिख्यां । उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्री
तिमवाप लक्ष्मीः । अत्र रात्रौ पद्मस्य संकोचो दिवा चंद्रस्य निःप्रभत्वं लोकप्रसिद्धमिति न पुनः कुत इति हे
तुं नापेक्षते । अनुकरणे तु सर्वेषां । सर्वेषां श्रुतिकटुप्रभृतीनां दोषाणां । यथा । मृगचक्षुषमद्राक्ष
मित्यादि कथयत्ययं । पश्यैष च गवित्याह सूत्रामाणं यजेति च । वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्व एम
चिन्नोभौ । वैयाकरणे वक्तरि प्रतिपाद्ये च रसे च रौद्रादौ कष्टत्वं गुणः । क्रमेणोदाहरणं । दीधीङ्वे ४२
वीङ्समः कश्चिद्गुणवृत्त्योरभाजनं । क्विप्प्रत्ययनिभः कश्चिद्यत्र संनिहिते न ते । अत्र वैयाकरणे वक्तातत्तो

तिशयेनवैयाकरणेप्रतिपाद्यकष्टत्वंगुणः॥तेननसप्रीत्यतिशयात्॥रौद्राद्यैर्विवक्षाद्यथाप्रागुदाहृतेमूर्द्धामु
हृत्तल्लस्तैत्याःकरणचाप्रतीतेर्गुणत्वंयदात्वामहमद्यान्तपदविद्याविशारदं॥उपाध्यायंतदास्मार्षंममस्मार्द्दंवसं
मदं॥अत्रवैया×दोउक्तसोक्तत्वेस्यादोषवत्तत्कटावर्णोओजोव्यंजयंतः॥प्रकृतवीरवीभत्सयोरनुगुणपमादध
तेत्वाद्यौचित्यवशाद्यथा॥गर्जद्घनघटाटोपेहरोहुंकारिणि॥किमन्येपिबहुर्वेन्नाःसीदंतिस्फुरदंतिनः॥अत्र
सिंहेवाक्येपरुषावर्णागुणः॥प्रकरणवशाद्यथा॥रक्ताशोककृशोदरीक्वनुगतात्यक्त्वानुरक्तंजनंनो
दृष्टेतिमुधैवचालयसिकिंवाताभिधूतंशिरः॥उत्कंठाघटमानषट्पदघटासंघट्टदष्टच्छदस्तत्पादाहति
मंतरेणभवतःपुष्पोद्गमोयंकुतः॥अत्रशिरोधूननेनकुपितस्यववसिविप्रलंभेपिगुणः॥क्वचिन्नीर
सेकष्टत्वंनगुणोनदोषः॥शृंगारवीरादिरसानामेकस्याप्यभावान्नापकर्षकमुत्कर्षकंच॥यथा॥नऊच्छ
सितैःकुरुदेवकार्यमर्थोयमर्थान्तरलभ्यएव॥अपेक्षतेप्रत्ययमंगलब्ध्यैबीजांकुरःप्रागुदयादिवांभः॥अ

का·प ४२ प्रयुक्तनिहतार्थौ श्लेषादौ न दुष्टौ श्लेषरूपालंकारस्य तयोस्तन्निर्वाहकत्वात्· प्रतीतिमाधुर्यस्यादोषत्वात्·
·यथा· येन ध्वस्तमनोभवेन बलिजित्कायः पुरा स्त्रीकृतो यश्चोद्वृत्तभुजंगहारवलयो गंगां च यो धारय
त्· यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च नामामराः पायात्स स्वयमंधकक्षयकरस्त्वां सर्वदो मा
धवः· अत्र माधवपक्षे शशिमद्दधकक्षयकरशब्दाव प्रयुक्तनिहतार्थौ· अश्लीलं क्वचिद्गुणः· यथा
स्करतारंभगोष्ठ्यां· द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्त्विति कामशास्त्रस्थितौ· करिहस्तेन संबाधे प्रवि
श्यांतर्विलोडिते· उपसर्पन्ध्वजः पुंसः साधनांतर्विराजते· शमकथासु यथा· उत्तानोच्छूनमंडू
कपाटितोदरसंनिभे· क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते· अत्र वैराग्यहेतुघृणोत्पादनया एम
जुगुप्सा गुणः· निर्वाणवैरदहनाः प्रशमादरीणां नंदंतु पांडुतनयाः सह माधवेन· रक्तप्रसाधितभु ४२
वः क्षतविग्रहाश्च स्वस्था भवंतु कुरुराजसुताः सभृत्याः· अत्र दुर्योधनानां मंगलस्नानाय कर्मणात्वे

नगुणत्वं॰ संदिग्धमपि क्वचिद्गुणः॰ यथा॰ कुभोजनं महाराज तवापि च ममापि चेत्यादौ॰ अत्र राज्ञो म
हिमावर्णनीयत्वान्नियतार्थप्रतिपत्तिकरत्वेन व्याजस्तुतिपर्यवसायित्वात्॰ एवं सामाजिकस्य ज्ञत्वे स
त्यप्रतीतं न दोषः॰ तथेतराज्ञातस्वज्ञानोत्कर्षधारा गुणस्य॰ अधमप्रकृतेर्विदूषकादेरुक्तिषु हास्य
करीषु ग्राम्योक्तिर्गुणः॰ एतद्द्वयं स्वयमुदाहार्यं॰ न्यूनपदं क्वचिद्गुणः॰ यथा॰ गाढालिंगनवामनीकृतकु
चप्रोद्भूतरोमोद्गमा सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितंबाम्बरा॰ मामामानद मामलमिति क्षा
माक्षरोल्लापिनी सुप्ता किंनु मृता नु किं मनसि मे लीना विलीना नु किं॰ अत्र पीडयेति पदमनुपा
त्तं वक्त्र्याहर्षमोहातिशयं प्रतिपादयत् गुणतामापद्यते॰ अध्याहारेण वाक्यार्थबोधविलम्बेपि प्रक
न रसपोषकत्वात्॰ उक्तरूपा मम मनसि सुप्ता किं निश्चलत्वेन वर्तमानत्वात्॰ सुप्तस्य श्वासादिक
मनुभूयत इत्यत आह॰ मृता नु किमिति॰ मृतापि वहिरनुभूयत इत्यत आह॰ लीनेति॰ जतुकाष्ठवदि

का॰प्र॰ ४३ तिशेषः तथाभूतस्यापि केन चित्प्रकारेण विघटनं कर्त्तुमशक्यत आह विलीनानु किमिति नीरन्ध्रीरवदि
तिशेषः क्वचिन्न गुणो न दोषः यथा तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यती त्यादौ पिहितेत्य
५३ नंतरं नैन घतरं त्यतेन्यूनैः पदै र्विशेषबुद्धेरेकरणान्न गुणः उत्तराप्रतिपत्तिः पूर्वाप्रतिपत्तिं वा धत्त
इति न दोषः अधिकपदं क्वचिद्गुणः यथा वृदवदजितः सख्यन्नु नेहतोजल्पंश्चतवत वास्मीति चित्रं
चित्रमरोदीघहेति परं मृते पुत्रे इत्येवमादो हर्षभयादियुक्ते वक्तरि हर्षादिपोषकत्वात् क्वचित्कथि
तपदं गुणः लाटानुप्रासे ऽर्थान्तरसंक्रमितवाच्ये विहितस्यानुवाद्यत्वे च क्रमेणोदा यस्य न सविधेद
यिता दवदहनस्तुहिनदीधितिस्तस्य यस्य च सविधे दयितादवदहनस्तुहिनदीधितिस्तस्य मित्राणि एम
तव मित्राणीत्यादौ जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते गुणप्रकर्षेण जनो ४३
नुरज्यते जनानुरागप्रभवा हि संपदः इति विशुल्लाटानुप्रासादित्रयसंपादकत्वात् एतत्प्रकर्षे क्वचिद्गुणः

यथा॰ प्रागप्राप्तनिशुम्भशांभवधनुर्द्वेधाविधाविर्भवत्क्रोधप्रेरितभीमभार्गवभुजस्तंभापविद्धः क्षणात्
उज्ज्वालः परशुर्भवत्वशिथिलः त्वत्कंठपीठातिथिर्येनानेन जगत्सु खंडपरशुर्देवो हरः ख्याप्यते॰ अत्र
चतुर्थपादे गुरोः स्मरणेन क्रोधाभावान्मसृणवर्णत्वमेवोचितमिति तस्यादोषत्वं॰ विनयप्रकाशक
त्वाच्च गुणत्वं॰ समाप्तपुनरात्तं क्वचिन्न गुणो न दोषः॰ यत्र न विशेषणदानार्थं पुनर्ग्रहणमपितु वाक्या
न्तरमेव क्रियते॰ यथात्रैव प्रागप्राप्तेत्यादौ॰ अत्रायमभिप्रायः॰ विशेषणस्य विशेष्यसाकांक्षतया विशे
ष्यपदावृत्तिनैयत्येन तद्विलंबेन विलंबः॰ वाक्यान्तरारंभे पुनरंगांगिभावेनाकांक्षावेगुण्यविरहान्न
दोषः॰ अपदस्य समासं क्वचिद्गुणः॰ यथोदाहृते रक्ताशोकेत्यादौ॰ नोद्दिष्टेति क्रोधोक्तौ दीर्घसमासाकर
णात्स्थानौचित्यविवेचनाभावेन क्रोधोन्मादपरिपुष्टिः॰ शृंगारे दीर्घसमासानौचित्यादस्थानसमास
तेति भास्करस्तथा च तस्य क्रोधपोषकत्वाद्गुणत्वमिति॰ एवमन्यत्रोपि लक्ष्यालक्ष्यं॥ ॥अथ रसदो

का.प षानाहः॥ ॥व्यभिचारिरसस्थायिभावानांशब्दवाच्यता॰कष्टकल्पनयाव्यक्तिरनुभावविभावयोः॰प्रतिकू
४४ लविभावादिग्रहोदीप्तिःपुनःपुनः॰अकांडेप्रथनच्छेदावंगस्याप्यतिविस्तृतिः॰अंगिनोननुसंधानंप्रकृ
५५ तीनांविपर्ययः॰अनंगस्याभिधानंचरसेदोषाःस्युरीदृशाः॰व्यभिचार्यादीनांस्वशब्देनोपादानेभावध्व
नित्वंचमत्कारित्वंरसत्वंचनस्यात्॰व्यंजितानामेवव्यभिचार्यादीनांतद्रूपत्वात्॰अतएवोक्तंव्यभि
चारीतथांजितइति॰तथात्रापिव्यक्तश्चमत्कारकारीशृंगारादिकोरसइति॰एवंव्यक्तःसतैर्विभावा
द्यैरित्यादिच॰एवंसत्येतेषांप्रधानकाव्यत्वंभवति॰एतत्सर्वंव्यंजनावृत्तेर्माहात्म्यं॰तत्रप्रमाणं
तुसहृदयहृदयमेव॰व्यभिचारिणःस्वशब्देनोपादानं॰यथा॰सव्रीडादयिताननेसकरुणामातंग एम
चर्मांबरेसत्रासाभुजगेसविस्मयरसाचंद्रेमृतस्यंदिनि॰सेर्ष्याजह्नुसुतावलोकनविधौदीनाकपा ४५
लोदरेपार्वत्यानवसंगमप्रणयिनीदृष्टिःशिवायास्तुवः॰अत्रव्रीडादीनां॰आनम्रादयिताननेमुकुलि

तामातंगगवर्मावरेसोत्कंपाभुजगेनिमेषरहिताचंद्रेमृतस्यंदिनि·मीलद्भ्रूःस्मरसिंधुदर्शनविधोम्लाना
कपालोदरे इत्यादिषूक्तं·एवमन्तेष्वादीनामनुभावव्यंग्यत्वसिद्धेः·एवंरसस्य रसशब्देन शृंगारादिश
ब्देनवावाच्यत्वं· यथा· तामनंगजयमंगलश्रियं किंचिदुच्चभुजमूललोकितां· नेत्रयोः कृतवतोस्य गो
चरे कोप्यजायत रसो निरंतरः· एवं शृंगारादिशब्देन वाच्यत्वेपि बोध्यं· एवं स्थायिनोपि· यथा· संग्रह
रे प्रहरणैः प्रहाराणां परस्परं·ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोप्यभूत· अत्रोत्साहस्य·कष्टक
ल्पनया विभावादेरभिव्यक्तौ स्फुटमेव दूषकताबीजं· प्रतिकूलविभावादिग्रह इति· यथा· शृंगारा
दिकं प्रतिकूलस्य शांतस्य विभावादेरुपादानं समूलमुन्मूलयतीति तदेव दूषकताबीजं· यथा· त्यज
तमानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः· परभृताभिरितीव निवेदिते स्मरमते रमते स्म व
धूजनः· दीप्तिः पुनः पुनर्विच्छिद्य ग्रहणं· विघ्नांतरसंबंधेन रसधाराविच्छेदो भवतीति तदेव दूष

का॰प॰ ४५ कतावीर्जं·यथाकुमारसंभवेरतिविलापे·अकांडेप्रथनं·यथावेणीसंवरणेवहूनांसंक्षयेप्रवृत्तेभानुम
४५ त्यासहदुर्योधनस्यशृंगारवर्णने·अकांडेछेदोयथावीरचरितेरामजामदग्न्ययोर्धारावाहिनिवीररसे
45 कंकणमोचनायगच्छामीतिरामस्योक्तौ·अंगस्यापिप्रधानस्यातिविस्तरेणवर्णनं·यथाहयग्रीवव
धेहयग्रीवस्य·अंगिनोननुसंधानंयथारत्नावल्यांबाभ्रव्यागमनेसागरिकायाविस्मृतिः·प्रकृ
तयोदिव्यादिव्यादिव्यादिव्याश्च·धीरोदात्तधीरोद्धतधीरललितधीरशांताउत्तमाधममध्यमाश्च·
तेषांलोकशास्त्रातिक्रमेणान्यथावर्णनंविपर्ययः·अनंगस्यरसानुपकारकस्य·यथाकर्पूर
मंजर्यांनायिकयात्मनाचवसंतवर्णनमनादृत्यवंदिवर्णितस्यराज्ञःप्रशंसनं·ईदृशादितिनायिका राम
पादप्रहारादिनानायककोपादिवर्णनं·उक्तंहि·अनौचित्यादृतेनान्यद्रसभंगस्यकारणं·प्रसिद्धौचि ४५
त्यबंधस्तुरसस्योपनिषत्परा·इति·इहेदानींयथासंभवंक्वचिददोषाएतइत्याह·नदोषःस्वपदेनोक्ता

व्यपि संचारिणः कथितः॥ यथा॥ प्रातः पुनः स्मारोदयाद्भानुः पश्येम कोदंडमनानतज्यं॥ इत्यत्र कस्तत्र
स रामभद्रो निद्रादरिद्रो रजनीमनैषीत्॥ अत्रोत्सकशब्द एव तदनुभावो झटिति नोत्तया प्रतीतिरुदिति
स्वशब्देनोपादानं॥ यथा वा॥ दूरादुत्सुकमागते विवलितमित्यादौ॥ औत्सुक्येन कृतत्वरा इत्यादौ च॥
तदनुभावस्य सहसा प्रसारणादिरूपस्य स्वशब्दस्येव तस्य झटिति प्रत्यायकत्वात्॥ संचार्यौद्य शब्दलक्ष्मणे
त्यादौ वितर्कमतिशंकाधृतीनां शांतसंचारिणां शृंगारपरिपंथिनामपि बाध्यत्वेनोक्तेः॥ शत्रुविजयपूर्व
कराज्यलाभवत्प्रकर्षविशेषाधायकत्वेन तत्परिपोषकता॥ तानुपमर्द्य चिंतायामेव विश्रांतेः॥ तेनात्र
प्रतिकूलविभावादिग्रहो न दोषः॥ संचार्यादेरित्यादिग्रहणाद्विरुद्धस्य विभावादेरपि बाध्यत्वेनोक्तो गुण
वहत्वं॥ यथा॥ सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः॥ किंतु मत्तांगनापांगभंगलोलं हि जीवितं॥ अत्र शृं
गारे विभावस्य शांतविभावस्य जीवितास्थैर्यरूपस्य परस्परं विरुद्धत्वेपि शृंगारविभावस्य बाध्यत्वेनाभि

का·प· धानात्वदोषत्वमपित्तुगुणत्वं शांतपरिपोषकत्वात्‌· सर्वाणामादयः सत्येव जीविते नैतर्यमुपादेयाः जी
४९ वितं वा तिमं गुरमिति किंकृतमुपादेयत्वमेतेषामतो रम्यत्वेपि निःफला एवेति पर्यवसानात्‌· आ
46 श्रयैक्ये विरुद्धोयः सकार्यो भिन्नसंश्रयः· रसांतरेणांतरितो नैरंतर्येणयो रसः· वीरभयानकयो
रेकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन भयानको निबद्धव्यः· शांतशृंगारयोर्नैरंतर्येण विरोध
इति रसांतरमंतरे कार्यं· यथा नागानंदे शांतस्य जीमूतवाहनस्य अहो गीतमहो वादित्रमित्यद्भुत
मंतर्निवेश्य मलयवतीप्रति शृंगारो निबद्धः· स्मर्यमाणो विरुद्धोयः साम्येनाथ विवक्षितः· अंगिन्यंग
त्वमाप्तौ यौ तौ न दुष्टौ परस्परं· यथा· अयं स रसनोत्कर्षी स्तन पूर्वावस्थास्मरणं शृंगारांगमपि करुणं एम
पोषयति· साम्येनेति· यथा· सरागया स्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया मु ४९
हुर्मुहुर्दशनविघट्टितोष्ठया रुषा नृपाः प्रियतमयेव भेजिरे· इत्यत्र शृंगाररौद्रयोः साम्याविवक्षणाददो

षत्वं॰ अंगिन्यंगत्वमिति॰ यथा॰ क्षिप्तो हस्तावलग्नः प्रसभमभिहतोप्याददानोंशुकांतं गृह्णन्केशेष्वपास्त
श्चरणनिपतितो नेक्षितः संभ्रमेण॰ आलिंगन्योवधूतस्त्रिपुरयुवतिः साश्रुनेत्रोत्पलाभिः कामी
वार्द्रापराधः शमयतु दुरितं शांभवो वः शराग्निः॰ इत्यत्र त्रिपुररिपुप्रभावातिशयस्य करुणेगं तस्य
तु शृंगारः तथा न करुणे विश्रांतिरिति तस्यांगत्वेन॰ तथा वप्राग्यथा कामुकश्चावरितवान्तथा
घशराग्निरिति शृंगारपरिपोषिणेन करुणेन मुख्य एवार्थउपोद्बल्यते॰॥ ॥इति काव्यपरीक्षायां
दोषनिरूपणं नाम तृतीय उल्लासः॥ ॥एवं दोषानुक्त्वा गुणालंकारयोर्विवेकमाह॰॥ ॥ये रसस्यां
गिनो धर्माः शौर्यादय इवात्मनः॰ उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॰ गुणानां वर्णगतत्वं निर
स्यति॰ रसस्येति॰ तत्र दृष्टांतमाह॰ आत्मन एवेति॰ यथा॰ आत्मन एव शौर्यादयो गुणाः॰ नाकारस्य तथा
रसस्यैव माधुर्यादयो गुणा न वर्णानां स्मृतिविनैर्वर्णैर्व्यज्यंत इति व्यंजकव्यंग्यभावसंबंधेन वर्णगतत्वे

का॰प्र॰ नव्यवह्रियंते॰ उत्कर्षहेतवइति॰ उत्कर्षश्चरत्याधायक क्लिन्नस्यैवैतन्यस्य आनंदांशे आवरणस्य सम्यगुच्छे
४७ दः॰ चमत्कारविशेषो वा॰ अचलस्थितयइति॰ नियतस्थितयइत्यर्थः॰ नैयत्यं च रसेन तदुपकारेण
५७ च॰ ते गुणा रसं विना नावतिष्ठंते॰ अवस्थिताश्चावश्यं रसमुपकुर्वंतीत्यर्थः॰ एतद्धर्मद्वयव्यतिरेकोऽलंका
रइति गुणालंकारयोर्विभागइत्येवदर्शयन्नाह॰ उपकुर्वंति तं संतं येंगद्वारेण जातुचित्॰ हारादिवदलं
कारास्तेनुप्रासोपमादयः॰ ये वाच्यवाचकलक्षणांगातिशयमुखेन तं मुख्यं रसं संतं संभविनमुपकुर्वं
ति ते कंठाद्यंगानामुत्कर्षाधानद्वारेण शरीरिणोउपकारका हारादयइवालंकाराः॰ यत्र नास्ति रसस्त
त्रोक्तिमात्रवैचित्र्यपर्यवसायिनः॰ क्वचित्संतमपिनोपकुर्वंति॰ यथा॰ अपसारय घनसारं कुरु हारं दू राम
रएव किं कमलैः॰ अलमलमालि मृणालैरिति वदति वानिशं बाला॰ इत्यादावनुप्रासेन शब्दानामलंक ४७
रांगद्वारा रसउपक्रियते॰ तथा॰ मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं प्रमाथी निर्धूमंज्वलति विधु

तः पावक इव · हिनस्ति प्रत्यंगं ज्वर इव गरीयानितरः तो न मां त्रातुं तातः प्रभवति न वांबा न भवती · अत्र वाच्यमुखेन
मालोपमयातीव्रत्वादिधर्मप्रत्याय्यविप्रलंभशृङ्गव्यते · उक्तिवैचित्र्यमात्रपर्यवसिता इति उक्तिवैचित्र्यंश
ब्दानां स्फुटत्वं बंधकौशलमर्थानामीषन्मनोहारित्वं · यथा · नीरसतरुरिह विलसति पुरतः · संतमपी
ति · यथा · चित्ते विहुट्टदि ण खुट्टदि सा गुणेसुं सेज्जासु लोट्टदि विसट्टदि दिम्मुहेसुं · बोल्लम्मि वट्टदि पअ
ट्टदि कव्वबंधे झाणे ण तुट्टदि चिरं तरुणी तरट्टी · अघसाममसर्वत्रानुषज्यत इत्यत्र तात्पर्यं · अत एव तत
रट्टी प्रज्ञा जाता इदं विरहिणो नायकस्य वचनं · अत्र संतमपि रसं नोपकरोति · ओजोव्यंजकस्य परुषा
नुप्रासस्य विप्रलंभानुकूलत्वात् · प्राकृतस्योजोगुणप्रधानत्वात् · तदनुकूलत्वेनादोषत्वाच्च · तथा ·
मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति क्रंदत्सु भ्रमरेषु वीक्ष्य दयितासन्नं पुनः सारसं · चक्रा
केन वियोगिना बिसलता नास्वादिता नोज्झिता कंठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः · अत्र वि

का॰प॰ ४९ ऽलंमेजीवितापगमस्येववर्णनीयत्वेतत्प्रतिबंधवर्णनेसंतमपिविप्रलंभमुपमानोपकरोति॰एवए
वगुणालंकारविवेकः॰ इदानीगुणानांभेदानाह॰माधुर्यौजःप्रसादाख्यास्त्रयस्तेनपुनर्दश॰आह्ला
५४ दकत्वंमाधुर्यंशृंगारेद्रुतिकारणं॰शृंगारेत्र्यर्थात्संभोगे॰द्रुतिर्गलितत्वं॰इहहिंसामाजिकानांचित्तेषु
नवरसीजन्यास्तिस्रोवस्थाः द्रुतिर्विस्तारोविकासश्च॰तत्रशृंगारकरुणशांतेभ्योद्रुतिः॰वीरबीभत्सरौ
द्रेभ्योविस्तारः॰हास्याद्भुतभयानकेभ्योविकाशः॰येनहास्येवदनविकाशः॰अद्भुतेनयनविकाशः॰भया
नकेद्रुतापसरणमिति॰करुणेविप्रलंभेनशांतेचातिशयान्वितं॰अत्यंतद्रुतिहेतुत्वात॰दीप्त्यात्मवि
स्तृतेर्हेतुरोजोवीररसस्थिति॰चित्तस्यविस्ताररूपदीप्तिहेतुरोजः॰बीभत्सरौद्ररसयोस्तस्याधिक्यंक्रमे एम ४९
णतु॰वीराद्बीभत्सेनततोपिरौद्रेसातिशयमोजः॰एवंहास्येशृंगारांगतयामाधुर्यंप्रकृष्टंविकाशधर्म
नयाओजोपिप्रकृष्टं॰एवमद्भुतेप्योजः॰माधुर्यमप्याह्लादकत्वरूपतया॰भयानकेप्येवमाधुर्यमयवि

स्यादेवरवनादयः॰क्वचित्तुप्रबंधानपेक्षयावाच्योचित्याद्रवनादयः॰उदाहरणंतुस्वयमूहनीयं॰एवंक
विद्वक्तृवाच्यानपेक्षयाप्रबंधोचिताएवते॰तथाहि॰आख्यायिकायांशृंगारेपिनमसृणावर्णादयः॰क
थायांरौद्रेपिनात्यंतमुद्धताः॰एवमन्यदप्यौचित्यमनुसर्त्तव्यं॰इतिकाव्यपरीक्षायांगुणनिर्णयोना
मचतुर्थउल्लासः॰॥ ॥अथालंकारानाह॰तत्रकाव्यलक्षणेशब्दस्यप्रागुपादानात्प्राक्शब्दालंकारा
नाह॰यदुक्तमन्यथावाक्यमन्यथान्येनयोज्यते॰श्लेषेणकाक्वावाज्ञेयासावक्रोक्तिस्तथाद्विधा॰तथाश्ले
षवक्रोक्तिः॰काकुवक्रोक्तिश्च॰उदाहरणं॰अहोकेनेदृशीबुद्धिर्दारुणातवनिर्मिता॰त्रिगुणाश्रूयतेबुद्धि
र्नतुदारुमयीक्वचित्॰काक्वा॰यथा॰गुरुजनपरतंत्रतयाद्दूरतरंदेशमुद्यतोगंतुं॰अलिकुलकोकिलल
लितेनैष्यतिसखिसुरभिसमयेसौ॰नायिकयानैष्यतीतिनिषिद्धेतत्सखीकाक्वाऽन्यथयति॰नैष्यतिएष्य
त्येवेत्यर्थः॰अन्येनेतिविवक्षणात्स्वोक्तेःस्वयमन्यथाकरणेऽत्रपह्नुतौनातिव्याप्तिः॰यथाकालेपयोधराणा

का·प
५३
53

मपतितयानैवशक्यतेस्थातेस्यानुं·उत्कंठितासितरलेन हि२सखिपिच्छिलः पंथाः॥ वर्णसाम्यमनुप्रा
सः॥ स्वरवैसादृश्येपि व्यंजनसादृश्यमनुप्रासः॥ छेकवृत्तिगतो द्विधा॥ छेको विदग्धः॥ गृहासक्ताः पक्षिमृग
श्छेकास्तामरः॥ तथावच्छेकवल्लभत्वाच्छेकानुप्रासइत्युच्यत इति केचित्॥ वृत्तिर्मधुरादिरसादिव्यंजिका
तन्नदानुपूर्वीरूपा। गतोक्तानः आम्रासुपाधिभ्यामिति शेषः॥ तत्र छेकानुप्रासो वृत्त्यनुप्रासश्चेति द्वि
धाज्ञेयः॥ किंतयोः स्वरूपमित्याह॥ सोऽनेकस्य सकृत्पूर्वः॥ अनेकस्यार्थाद्व्यंजनस्य सकृदेकवारं साम्यं
छेकानुप्रासः॥ यथा॥ ततोरुणपरिस्पंदमंदीकृतवपुः शशी॥ दध्रे कामपरिक्षामकामिनीगंडपांडुतां॥
एकस्याप्यसकृत्परः॥ एकस्य अपि शब्दादनेकस्य व्यंजनस्य द्विर्बहुकृत्वो वा सादृश्यं वृत्त्यनुप्रासः॥ एग्र
वृत्तिं विभजते॥ तत्र॥ माधुर्यव्यंजकैर्वर्णैर्वैदर्भीरीतिरिष्यते॥ ओजःप्रकाशकैर्गौडीयां वाल्मीनैस्तथापरैः॥ ५३
सर्वत्रप्रागुदाहृतं॥ अनंगरंगप्रतिममित्यादि॥ मू॰ सूर्योमुद्दृत्तकृत्त्वेत्यादि॥ अपसारय घनसारमित्या

दिव॰ श्चादकलाटानुप्रासो भेदे तात्पर्यमात्रतः॰ शाद्ः शब्दगतोनुप्रासः॰ शब्दश्च पदं प्रातिपदिकं च॰ पदानां सः
सः लाटानुप्रासः॰ प्रागुदाहृतं॰ यस्य न सविधे दयिते त्यादि॰ पदस्यापि॰ वदा॰ वदनं वरवर्णिन्याः सत्यं तस्याः
सुधाकरः॰ सुधाकरः क्वानु पुनः कविकल्तो भवेत्॰ वृत्तावन्यत्र तत्र वा॰ नाम्नः सवृत्त्यवृत्त्योश्च॰ एकस्मिन्स
मासे भिन्ने वा समासे समासासमासयो र्वा नाम्नः प्रातिपदिकस्य तु पदस्य सारूप्यं॰ यथा सितकरकररुचि
रविभाविभाकराकारधरणिधरकीर्त्तिः॰ पौरुषकमलाकमलासापि तवैवास्ति नान्यस्य॰ न देवं पंचधा मतः
अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः॰ यमकं॰ अर्थभिन्नानामिति॰ एकार्थकत्तिन्नानामित्यर्थः
तेन लाटानुप्रासेनातिप्रसंगः॰ उभयोरेकस्य वा निरर्थकत्वे संग्रहः॰ यथा समरसमरसोयमित्यादे
सेति॰ सरोरस इत्यादि वैलक्षण्ये न तेनैव क्रमेण स्थिता॰ पादश्च आगद्वित्तितयात्पनेकता॰ पादः पद्य
चतुर्थांशः तद्भागस्तदर्द्धतदर्द्धादिरूपः॰ क्रमेणोदा॰ यथा मम तु॰ अवलएघविभर्त्तिनिरंतरं मृदुलता

का॰पा॰
५४
54

महत्तीरसभावनं॰ वहन्तिवात्रवनेयुवतीगणो मृदुलता महतीरसभावनं॰ यदानतोयदानतो नयात्ययंन
यात्ययं॰ शिवेहितां स्मरामि तां स्मरामि तां॰ रामोहंजनयत्येव रामोहमिति धीर्नवेत् सरामोहमि
ति ज्ञातुं सरामः सज्जनांतिकं॰ नारतारतरैरेने रुन्नरोन्नरनो रुनैः रनान्नो निन्निरीरो निनीरेतरौतरोः॰ एव
मर्थावृत्तिश्लोकावृत्त्यादिभेदा द्रष्टव्याः॰ वाच्यभेदेन भिन्ना यद्युगपद्भाषणस्पृशः॰ श्लिष्यन्ति शब्दाः श्लेषोसौ॰
अर्थभेदेन शब्दभेदइति दर्शने काव्यमार्गे स्वरो न गण्यत इति च नयेवाच्यभेदेन भिन्ना अपि यद्युगप
दुच्चारणेन श्लिष्यन्ति भिन्नं स्वरूपमपह्नुवते स श्लेषः॰ यथा महत्यागदयायुक्तः सत्प्रभामासमन्वितः॰
भवाञ्चा भगवांश्चापि गतो भेदः परस्परं॰ अयं सभंगश्लेषः॰ अभंगश्लेषो यथा॰ योसकृत्परगोत्राणांपक्षच्छेदक्षणक्ष
णमः॰ शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते [redacted] अत्राभिधानियंत्रणाभावाद्वावप्यर्थौवाच्यौ॰ ५५
अयं शब्दश्लेषः॰ अत्र हि शब्दाः परिवृत्तिं न सहन्ते॰ यत्र तु शब्दाः परिवृत्तिंसहन्ते सोर्थश्लेषः॰ यथा लोके नोत्थति

मायाति श्लोकेनायात्यधोगतिं· अहो स्कुसदृशी दृत्निस्कलाकोटेः खलस्यव· अत्राल्पेनोद्रेकमायातीति पाठेऽपि
भवति श्लेषोयमित्यर्थश्लेषोयमिति· एवं सकलकलंपुरमेतज्जातं संप्रतिसितांशुबिंबमिवेत्यादौ श्लेषप्रति
भोत्पत्तिहेतुरुपमा· न तूपमाप्रतिभोत्पत्तिहेतुः श्लेषः· यतः श्लेषस्यैव साम्यनिर्वाहकता न तु साम्यस्यैव श्ले
षनिर्वाहकता· श्लेषवं धतः प्राक् साम्यस्यानुपस्थितेः· अत्र सकलकलशब्द एव साधारणो धर्मः· अथवा
सकलत्वयोरेकशब्दवाच्यत्वेन साजात्यमिति बोध्यः· एवमत्र विंदुसुंदरीनित्यं गलल्लावण्यबिंदुकेत्या
दौ श्लेषप्रतिभोत्पत्तिहेतुर्विरोधो न तु विरोधप्रतिभोत्पत्तिहेतुः श्लेषः· श्लेषेऽर्थद्वयस्यान्वयबोधविषयत्वं
इह त्वेकस्यैवान्यस्यतूपस्थितिमात्रं· तथा· सर्वस्वमुक्तामणिः· नान्यः कविरिवस्वल्पश्लोकोद्देवमहाप्र
वान्· अनुरागवतीसंध्यादिवसस्तत्पुरःसरः· अहो दैवगतिश्चित्रा तथापि न समागमः· इत्यादौ परंप
रितरूपकव्यतिरेकसमासोक्तिषु श्लेषस्य निर्वाहकत्वं· न तु श्लेषे विश्रांतिरिति· अथ विचित्रं प्रकीर्त्यते·न

का·प
५५
र

चित्रंयत्रवर्णानांपद्माद्याकृतिहेतुता·संनिवेशविशेषेणयत्रन्यस्तावर्णाःपद्माद्याकारतामुल्लासयंतितच्चि
त्रं·यथाभासतेप्रतिभासाररसाभाताहताविभा·भाविताम्मासुभावादेदेवाभावततेसभा·पद्मबंधः·रसा
सारसासारसायताक्षक्षतायसा·सातावाततवातासारक्षतस्त्वस्वतक्षर·सर्वतोभद्रः·एवमन्येपिखड्ग
बंधादयोनुसर्त्तव्याः·पुनरुक्तवदाभासोविभिन्नाकारशब्दगा·एकार्थतेवशब्दस्य·अर्थांतरसंक्रमित
वाच्येऽतिप्रसंगवारणायविभिन्नाकारेति·विज्ञानीयानुपूर्वीकशब्दगेत्यर्थः·तत्रवनानुवीभेदः·एका
र्थत्वेनेवापाततोभासनंपुनरुक्तवदाभासः·पुनरुक्तस्येवपुनरुक्तवत्·आभासोज्ञानं·सचशब्द
स्यकेवलशब्दनिष्ठः·यथा·चकासत्यंगनारामाःकौतुकानंदहेतवः·तस्यराज्ञःकमनसोविबुधाःपार्श्व एम
वर्तिनः·तथाशब्दार्थयोरयं·यथा·तनुवपुरजघन्योसौकरिकुंजररुधिररक्तखरनखरः·तेजोधामम ५५
हः पृथुमनसामिंद्रोहरिर्जिष्णुः·अत्रएकस्मिन्पदेतनुकरिरक्तेत्यादिरूपेपरिवर्तितेनालंकारइतिशब्दा

लंकारः अपरस्मिंश्च वपुः कुंजररुधिरादिरूपे प्रतिवर्त्तितेपि न सहीयत इत्यर्थनिश्चय इत्युभयालंकारोयं
इति शब्दार्थालंकारयोर्मध्ये कथितः अथार्थालंकारानाह साधर्म्यमुपमा भेदे समानैर्वहुभिर्धर्मैः
संबंधः साधर्म्यं तद्भिन्नत्वे सति तत्कृतभूयो धर्मवत्वमुपमेति निर्गलितोर्थः भेदग्रहणमनन्वयव्य
वच्छेदाय पूर्णा लुप्ता च उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामुपादाने पूर्णा एकस्य
द्वयोस्त्रयाणां वानुपादाने लुप्ता सा त्रिमा श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा यथेववादिश
ब्दा यत्पराः स्तस्यैव श्रुत्यैवोपमानताप्रतीतिरिति यथेववादिशब्दसत्वे श्रौती न थैव नतस्यैत्रवेत्यनेन
इवार्थे विहितस्य वतेरुपादाने सदृशतुल्यादिशब्दयोगे सरसिजमिदमाननं च तत्स्याः समम् इति वेत
सि संमदं विधत्त इत्यादौ प्रकृताप्रकृतनत्वपर्यालोचनयैवोपमेयोपमानताप्रतीतिरित्यार्थी तत्र तेन
नुतुल्यमित्यादिना विहितस्य वतेः स्थितौ इवेन नित्यसमासो विभक्त्यलोपश्चेत्यनेन नित्यसमासे इ

का॰प॰ ५६ शब्दयोगे समासगा॰ समासानुशासनप्रयोजनं त्वत्रिशिवराजइत्यादौ॰ क्रमेणोदाहरणं॰ उत्थाय हृदि ली
यंते दरिद्राणां मनोरथाः॰ बालवैधव्यदग्धानां कुलस्त्रीणां कुचा यथा॰ चकितहरिणलोललोचनायाः
56 क्रुधि नितरामरुणाभिरामशोभं॰ सरसिजमिदमाननं च तस्याः सममिति चेतसि संमदं विधत्ते॰ वागर्था
विव संपृक्तौ वागर्थप्रतिपत्तये॰ जगतः पितरौ वंदे पार्वतीपरमेश्वरौ॰ आद्यंतमध्यरहितं दशाहीनं पुरा
तनं॰ अद्वितीयमहं वंदे मद्वस्त्रसदृशं हरिं॰ गांभीर्यगरिमा तस्य सत्यं गंगाभुजंगवत्॰ दुरालोकः स
समरे निदाघांबररत्नवत्॰ अत्र लुप्ता॰ तत्र सा धारणधर्मलोपे भवत्युपमा॰ न श्रौती तद्धिते पुनः॰ य
था॰ वचस्तस्यामृतं यथा॰ उपमानानुपादाने पि भवत्युपमा॰ यथा॰ न काव्यसदृशं किंचिदन्यदस्तीह तो
षकृत्॰ एवं वादेर्लोपे समासे क्विक्यङि॰ णमुलि च भवत्युपमा॰ क्रमेण यथा॰ ततः कुमुदनाथेन राम ५६
कामिनीगंडपांडुना॰ नेत्रानंदेन चंद्रेण माहेंद्री दिगलंकृता॰ पौरं सुतीयति जनं समरांतरे सावतःपु

रीयतिविचित्रचरित्रचंचुः॰नारीयतेसमरसीम्निकृपाणपाणेरालोक्यतस्यललितानिसपत्नसेना॰म
घेनिदाघघर्मांशुदर्शपश्यन्तितंपरे॰सपुनःपार्थसंचारंसंचरत्यवनीपतिः॰तथाधर्मवाद्योर्लोपेक्विस
मासगा यथा॰सविताविधवतिविधुरपिसवितरतितथादिनंतियामिन्यः॰यामिनयंतिदिनानिचसुख
दुःखवशीकृतेमनसि॰समासेयथा॰राजकुंजरः॰एवंधर्मोपमानयोर्लोपेपि॰ यथा ढुंढुल्लंतम
रीहसिकंटअकलिआइंकेअइवणाइं॰मालइकुसुमसरिच्छंभमरभमंतोणपाविहिसि॰एवंक्य
विवाद्युपमेयमेयलोपे॰ यथा॰कृपाणोदग्रदोर्दंडःससहस्रायुधीयति॰अत्रात्माउपमेयः॰एवंत्रया
णांवादिधर्मोपमानानांलोपेभवत्कममा यथा॰मृगनयनामानसंहरतीत्यादौसप्तम्कपमाने
त्यादिनायदासमासस्तलोपो॰अनयेनवराज्यश्रीर्दैन्येनेवमनस्विना॰मम्लौसाथविषादेनपद्मिनीव
हिमांभसेत्यादौएकस्यैवबहूपमानोपादानेमालोपमा॰तथायथोत्तरमुपमेयस्योपमानत्वेर

काप॰ ५७ 57 सनोपमावोध्याः शृंखलान्यायेन पश्चादल्लनर्य॰ मंतिरिवमूर्त्तिर्मधकरामूर्त्तिरिवसक्षाप्रभावविताल्तस्य
सभेदजयश्रीः शाक्याजेतुंन्टपस्यनपरेषां॰ एवमन्यदपिबोध्यं॰ उपमानोपमेयत्वेएकस्यैवै
कवाक्यगे॰ अनन्वयः उपमानोपमेयत्वइति॰ उपमानत्वमुपमेयत्वंचेत्यर्थः उपमेयोप
मावारणायएकवाक्यगेइतिउपमानांतरसंबंधोन्वयः तदभावोनन्वयः अतोत्रउपमानांतरव्य
वच्छेदनचमत्कारइत्युपमातोस्यभेदः॰ यथा॰ गगनंगगनाकारं सागरः सागरोपमः॰ रामरावण
योर्युद्धं रामरावणयोरिव॰ विपर्यासउपमेयोपमानयोः॰ तयोरुपमानोपमेययोः विपर्यासः परि
वृत्तिः॰ अर्थाद्वाक्यद्वयेउपमेयेनोपमाउपमेयोपमा॰ यथा॰ कमलेवमतिर्मतिरिवकमलातनु एम
रिवविभाविभेवतनुः॰ धरणीवधृतिधृतिरिवधरणीसततंविभातिवतयस्य (विभो)॰ संभावनमथोत्प्रेक्षा ५७
प्रकृतस्यसमेनयत्॰ समेनोपमानेन समेनत्यनेतरमेकरूप्यलेतिशेषः॰ तथावसमेनेकरूप्य

णसंभावनमुत्प्रेक्षेत्यर्थः॥ संभावना चोत्कटकोटिकः संदेहोऽयं चंद्र एव भविष्यतीत्याकारः॥ यथा॰ अत्र
स्रमास्फालितवल्लकीगुणक्षतोज्ज्वलं गुच्छनखांशुभिन्नया॰ पुरः प्रवालैरिव पूरितार्द्धया विभांतम
च्छस्फटिकाक्षमालया॰ ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः॥ भेदो वैधर्म्यं॰ प्रस्तुतस्य समेन यदि
त्यनुवर्तते॰ तुर्भिन्नक्रमे॰ यदिति लिंगव्यत्ययात् संशयस्तेनेनाचेति॰ तथा च प्रकृतस्य समेन संश
यस्तु यः ससंदेहनामालंकार इत्यर्थः॥ भेदोक्तौ यथा॰ द्विधाकृतात्मा किमयं दिवाकरो विधूमरो
चिः किमयं हुताशनः॥ गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्द्धज्वलनं हविर्भुजः॥ पतत्यधोधा
म विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः॥ तदनुक्तौ यथा॰ अस्याः सर्गविधौ प्रजापतिर
भूच्चंद्रो नु कांतिप्रदः शृंगारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः॰ वेदाभ्यासजडः कथं नु विष
यव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥ तद्रूपकमभेदो य उपमानोपमे

ययोः॰ अथवा॰ उपमैव तिरोभूतभेदा रूपकमिष्यते इति॰ यथा॰ अथालम्बमगान्तु गैनकांतवपुर्जलधिव्य
लीत्यच्छाशिदाशरथिः॰ परिवारितः परितरुन्त्वगणैः क्लिमिरौघराक्षसबलं विभिदे॰ यथावा॰ हिंदोलिके
य मिंदोः कलिकानंगस्य कौसुमी जयति॰ या मानीय मनो भूरांदोलयति प्रवासिवेनासि॰ मालानुपूर्व
वत्॰ पूर्ववन्मालोपमावत्॰ यदा एकस्मिन्बहव आरोपिताः स्तदा मालारूपकं॰ यथा॰ रूपामृतस्यवा
पीका विजयश्री रनंगस्य॰ विभ्रमरसैकसंपत्तजयनि जनानंदकंदलीवाला॰ नियताऽरोपणोपायः
स्यादारोपः परस्य यः तत्परं परितं श्लिष्टे वा वके भेदभाजि वा॰ यथा॰ विद्वन्मानसहंस वैरिकमला
संकोचदीप्तद्युते दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर॰ सत्यप्रीतिविधानदक्ष विजयप्राग्भा
वभीमप्रभोसाम्राज्यंवरवीरवत्सरशतं वैरिंच मुच्चैः क्रियाः॰ मानसमेव मानसं कमलायाः संकोच ए
व कमलानामसंकोचः॰ दुर्गाणां मार्गणमेव दुर्गायामार्गणं॰ समितां स्वीकार एव समिधां स्वीकारः॰ स

त्वप्रीतिरिवसत्यामप्रीतिः॰ विजयः परपराभवएवविजयोर्जुनः॰ एवमारोपणनिमित्तोहंसादेरारोपः॰ यद्य
पि शब्दार्थालंकारोयं तथापि प्रसिद्धिवशादत्रोक्तः॰ भेदभाज्ञियथाः आलानंजयकरिणः प्रतापतप
नस्य पूर्वाद्रिः॰ सेतुर्विपत्तिजलधेः धरणिभृज्जस्ते भुजो जयति॰ अत्र जयादेर्भिन्नशब्दवाच्यस्यकरित्वा
द्यारोपेभुजस्यालानताद्यारोपोयुज्यते॰ मालापिपूर्ववद्बोध्या॰ प्रकृतंयन्निषिध्यान्यत्साध्यतेसात्वप
ह्नुतिः॰ त्रिविध्या॰ पौंडेमेयमसत्यं कृत्वा॰ यथा॰ स्फुटनीलोत्पलपटलं शुधामयूखेसुधासरसिम
न्यामहे नितं विनिनेयकलंकः परिस्फुरति॰ यथावा॰ तदोजसस्तद्यशसः स्थिताविमौवृथेतिचित्तेकुरुते
यदायदा॰ तनोतिभानोः परिवेषकैतवान्नदाविधिः कुंडलनांविधोरपि॰ एवमियंमंगपंतरेप्यूह्या॰ घोतयि
त्वाकमप्यर्थंगोपनीयंकथंचन॰ यदिश्लेषेणान्यथावान्यथयेत्साप्यपह्नुतिः॰ यथा॰ कालेपयोधराण
मित्यादिप्रागुक्तं॰ श्लेषः सवाक्यएकस्मिन्यत्रानेकार्थताभवेत्॰ अनेकार्थताशक्त्यानिरूढलक्षणया

वयत्र भवति सम्श्लेषः यथा॰ उदयमयते दिग्मालिन्यं निराकुरुते तरां नयति निधनं निद्रामुद्रांप्रवर्त्तयति
क्रियाः॰ रवयति तरां स्वे राचारस्य वर्त्तनकर्त्तनं वनवतत्लसन्नेजः पुंजो विभाति विभाकरः॰ विभाकरः सू
र्यः॰ राज्याभिषेककाले पुरोहितादिभिस्तुत्यत्वेन प्रतापरुद्रादिवत्संकेतितो नृपविशेषश्च उदयं पूर्वा
चलंसंपदं च॰ दिशांमालिन्यमंधकारस्यैवं धाद्विरूपाणांजनानां कुवेशात्वं च॰ एवमन्यपि पदानि वोध्यानि
॰ परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः॰ प्रकृतार्थप्रतिपादकेन वाक्येन श्लिष्टानां। प्रकृताप्रकृतसाधार
णानां भेदकानां विशेषणानां माहात्म्यात्। ननु विशेष्यसामर्थ्यादपि॰ यदप्रकृतस्यार्थस्योक्तिरभिधा
नं व्यंजनं समासेन संक्षेपेणार्थद्वयस्य कथनात्समासोक्तिः॰ यथा॰ लहिऊण तुज्झ वाहुप्फंसं जीए स
को वि उल्लासो॰ जअलच्छी तुह विरहे ण ऊज्जला दुब्बला ण सा॰ अत्र तत्तद्विशेषणसामार्थ्याज्जयलक्ष्मी
व्यवहारे कान्ताव्यवहारस्यारोपमाणस्य चमत्कारकारिते ति॰ इयमन्येरेकदेशविवर्त्तिरूपकमिति नि

एषते · निदर्शना · असंभवद्वस्तुसंबंध उपमापरिकल्पकः · निदर्शनादृष्टांतीकरणं · वस्तुसंबंधो द्विधा · वाक्यार्थ-
पदार्थभेदात् · तत्राद्यो यथा · क्व सूर्यप्रभवो वंशः · क्व चाल्पविषया मतिः · तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि
सागरं · अत्राल्पविषयमन्मत्या रघूणां वंशवर्णनं न स्यादित्येको वाक्यार्थः · अपरस्तूडुपेन सागरत-
रणं · न चोपमानोपमेयभावं विना तयोः परस्परसंबंधः संभवतीत्युडुपेन सागरतरणमिव मन्मत्या
सूर्यवंशवर्णनमित्युपमायां पर्यवसानं · द्वितीयो यथा · अस्या मुखस्य लीलां वहति शरच्छर्वरीनाथः ·
अत्र कथमन्यस्य लीलामन्यो वहतीति तत्सदृशीमित्युपमायां पर्यवसानं · पूर्ववन्मालापि बोध्या · य-
था · दोर्भ्यां तितीर्षति तरंगवतीभुजंगमादातुमिच्छति करे हरिणांकबिंबं · मेरुं लिलंघयिषति ध्रुवमे-
ष देव यस्ते गुणान्गदितुमुद्यममादधाति · स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च सा परा · क्रिययैव स्वस्व-
कारणयोः संबंधो यत्रावगम्यते उपमापरिकल्पक इत्यनुवर्तते सा ऽपरा निदर्शना · यथा · उन्नतं पद

का·पा· मुपैति यो लघुर्हेलयैव स पतेदिति ब्रुवन्॥ शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः॥ अत्र पतन
६० क्रियया पतेदिति क्रियया सहेलाघवे स निउन्नतपदप्राप्तिरूपस्य कारणस्य संबंधः ख्याप्यते॥ स वाच्य
60 स्यापि लघोरुन्नतपदप्राप्तिस्तद्वत्पतनापेत्क्षमा यां पर्यवस्यतीति निदर्शना॥ इयं संभवद्वस्तुसंबं
धमूलेति पूर्वतो भेदः॥ अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया॥ अत्राप्राकरणिकस्यार्थस्याभिधानेन
प्राकरणिकस्यार्थस्याक्षेपो अप्रस्तुतप्रशंसा॥ अस्या वक्ष्य विषयत्वेपि तुल्ये प्रस्तुते तुल्यांतरस्याभिधाने ऽ
तीव चमत्कार इति तदेवोदाह्रियते॥ यथा॥ अत्रि वितततमोंधकूपगर्भादिदमुद्धारि करेण येन विश्वं॥ व
रमगिरिगभीरगह्वरांतः पतति स एष न केश्विदीक्ष्यते पि॥ अत्राप्रस्तुतस्य तथाविधस्य रवेरभिधाने एम
न कृतानेकोपकारस्य कस्य चिन्महापुरुषस्य दुर्दशायां केनापि किंचिन्नोपकृतमित्याक्षिप्यते॥ एवमन्यत्रा ६०
पि बोध्यं॥ यथा॥ अविदग्धवणिग्वीथी धूली धूसरितो मणिः॥ केनापि गुणपजनुषा विदुषा परिवेष्यते॥ अत्र

दृश्यास्य मणेरभिधानेन केनापि दुर्विदग्धेनावमानितो गुणवत्तरः केनापि विज्ञोत्तमेन सत्कर्त्तव्य इत्या-
क्षिप्यते· निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्· प्रकृतं निगीर्यासाधारणधर्मेणानुक्तात्तेन रूपका-
द्यस्य भेदः· अध्यवसानं तत्तादात्म्येनाध्यवसायः· यथा· लतामूले लीनो हरिणपरिहीनो हिमकरः
स्रवन्मुक्ताकारागलनिजजलधाराकुलतया· कनीन्ते वंधूकं तिलकुसुममद्यापि पवनो गृहद्वा-
रेषु एषं परिणमति कस्यापि कृतिनः· यच्च तदेव तदन्यत्वेनाध्यवसीयते सात्र परा· यथा· अन्यदेव हि
लावण्यमन्यैवास्यास्तनुद्युतिः· तन्मन्ये रचना नैषा सामान्यस्य प्रजापतेः· यद्यर्थेति· यदिशब्देन चेच्छब्देन
वा यत्कल्पनमर्थादसंभविनोर्थस्य सा तृतीया· यथा· उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगंगापयसः
पतेतां· तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः· कारणस्य शीघ्रकारितां वक्तुं कार्य-
स्य पूर्वकालोक्तौ समकालोक्तौ वा तुर्थी· यथा· हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन· चरमं

का·प·
६१
61

रमणीवल्लभलोवनविषयं त्वया भजता· समकालोक्तौ यथा· सममेव समाक्रांतं द्वयं द्विरदगामिना· ते
न सिंहासनं पित्र्यमखिलं वारिमंडलं· प्रतिवस्तूपमा तु सा· सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः·
सामान्यस्य साधारणधर्मस्य वाक्यद्वये उपमेयवाक्ये उपमानवाक्ये च· यथा· देवीभावं गमिता
परिवारपदं कथं भजत्वेषा· न खलु परिभोगयोग्यं दैवतरूपांकितं रत्नं· अत्र कथमित्यनेन न खल्वित्यने
न चाभ्यनौचित्यं प्रत्याय्यते· इत्येकस्यैवानुचितत्वरूपसामान्यस्य शब्दभेदेन द्विरुपादानं· यदि दहत्यनलो
त्रेत्यादिमालारूपाप्येषा बोध्या· दृष्टांतः पुनरेतेषां सर्वेषां सर्वेषां प्रतिबिंबनं· यथा योगमेतेषां साधारण
धर्मादीनां प्रतिबिंबनात्तत्र यत्र वाक्यद्वये विशेष्यस्य विशेष्येण विशेषणानां च विशेषणैर्यथायोगमुप गम
मेयोपमानभावः प्रत्याय्यते· यथा· दर्पांधगंधगजकुंभेत्यादौ यथा कटान्तरूपाणयोरुपमानोपमे ६१
यभावः तथा स्तोविः कषायकांत्योरपि· दृष्टांतो निश्चयो यत्र स दृष्टांतः· गृहीतप्रामाण्यकः· यत्र दृष्टांतवा

कोनदार्ष्टांतिकवाक्यार्थनिश्चयस्यप्रमाणप्रग्रहो भवतीत्यर्थः यथा । त्वयि दृष्टएव तस्या निर्वाति मनो मनोभवज्व
लितं । आलोके हि हिमांशोर्विकसति कुसुदं कुमुद्वत्याः ॥ सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनां । सेव क्रि
यासु बह्वीषु कारकस्येति दीपकं । वृत्तिरुपादानं धर्मस्य क्रियादिरूपस्य । एकस्य सममस्तकाय्यो दीप
नाद्दीपकं । यथा । किविणाण धणं णाआण फणमणी केसराइं सीहाणं । कुलवालिआण थणआ
कौत्तो छिप्पंति अमुआणं । अत्रस्पृश्यंत इति क्रियासकृदुपात्ता । एवं बह्वीषु क्रियासु एकस्य कारकस्योपा
दानं बोध्यं । मालादीपकमाद्यं वेद्यथोत्तरगुणावहं । पूर्वेण पूर्वेण वस्तुनोत्तरोत्तरं वेदुपक्रियते तन्माला
दीपकं । यथा । संग्रामांगणसंगतेन भवता चापे समारोपिते संप्राप्ते परिपंथियोधनिवहे सांमुख्यमासादि
तं । कोदंडेन शराः शरैररिशिरस्तेनापि भूमंडलं तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयं । अत्र निः
सपत्नभूलोकत्रयव्यापिकीर्तिलाभान्तपोत्कर्षः प्रतीयते । तत्र पूर्वं यथायोगमुत्तरत्रोपकारकाः । नियता

का॰प्र॰ नांसकृद्धर्मः सापुनस्तुल्ययोगिता॰ नियतानां प्राकरणिकानामेवाप्राकरणिकानामेव वा॰ इत्त्रिरित्यनुव
६२ र्तते॰ अर्थवशाद्विभक्तिपरिणामस्तथा च वर्ण्यते उपादीयते सकृद्धर्म इत्यर्थः॰ यथा॰ पांडुक्षामं वदनं हृ
62 दयं सरसं तवालसं च वपुः॰ आवेदयति नितांतं क्षेत्रियरोगं सखि हृदंतः॥ अत्र विरहानुभावत्वेन प्रकृता
नां पांडुतादीनां सकृदुपात्तावेदनक्रियान्वयः॥ एवमप्रकृतानामपि॰ उपमानाद्यदन्यस्य व्यतिरेकः
स एव सः॰ अन्यस्योपमेयस्य व्यतिरेक आधिक्यं॰ यथा॰ इयं सुनयना दासीकृततामरसश्रिया॰ आ
ननेनाकलंकेन जयतीदुं कलंकिनं॰ हरवन्न विषमदृष्टिर्हरिवन्नो विधुन वितततृष्णः॰ रविवन्न चाति
दुःसहकरतापितभूः कोऽपि विदसि॰ इति मालापि वोध्या॰ आन्नेपक उपमानस्य प्रतीपमुपमेयता॰ तस्यैव एम
यदि वा कल्प्यातिरस्कृतिं वंधनं॰ इति उभयरूपस्य प्रतीपस्यात्र व्यतिरेक एवांतर्भावः॥ यथा॰ लावण्यौक ६२
सि राजनि राजस्य स्मिन्किमिंदुर्विवेन॰ द्वितीयं यथा॰ शृणु सखि तव तव वनीयं तव वदनेनोपमीयते चंद्रः॥

अत्रोपमेयस्य न्यूनतायामपि व्यतिरेकमिच्छंति॥ यथा॥ हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैः दूतप
थः सितीकृतः॥ तथा॥ मया हंस रामत्वं कुशलवसुतानत्वधिगता॥ इत्यादिषु॥ निषेधो वक्तुमिष्टस्य
यो विशेषाभिधित्सया॥ वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः॥ वक्तुमिष्टस्य विवक्षितस्या
शक्यवक्तव्यत्वमतिप्रसिद्धं वा विशेषं वक्तुं निषेधो निषेध इव यः स यथाक्रमं वक्ष्यमाणविष
य उक्तविषय इति द्विविध आक्षेपः॥ यथा॥ ए एहि किं पि कीए कए णिक्किव भणामि अलमह
वा॥ अविआरिअकज्जारंभआरिणी मरउ ण भणिस्सं॥ अलमिति न भणिष्यामीत्यर्थः॥ न भणि
ष्यामीति पौनरुक्त्यं खेदातिशयपोषकं॥ अत्र वक्ष्यमाणायां मरणावस्थायां तस्या अशक्यवक्तव्य
त्वमलमित्यादिना निषेधो व्यंजयति यथा॥ ज्योत्स्नाचंदनमालाहालाहलतां परिप्राप्ताः॥ संप्रति स्फुटदथो
हं तानेन किं सुक्तेन नन्नमः॥ अत्र नन्नम इति निषेधो विरहे यीतस्यानां दुःसहत्वमतिप्रसिद्धमिति व्यन

का॰प॰ ६३ 63 क्तिः॰ क्रियायाः प्रतिषेधेपि फलव्यक्तिर्विभावना॰ क्रियाकारकव्यापारः॥ वैयाकरणाः क्रियाया एव हेतुतां
मन्यंते॰ तथाच हेतुरूपक्रियाप्रतिषेधेपि तत्फलप्रकाशनं विभावना॰ अप्रसिद्धं कारणमाश्रि
पतीति न विरोधः॰ यथा॰ कुसुमितलतालिरहताप्यधत्तरुजमलिकुलैरदष्टापि॰ परिवर्त्तते स्म
नलिनीलहरीभिरलोलिताप्यघूर्णनसा॰ विशेषोक्तिरखंडेषु कारणेषु फलावचः॥ अत्राप्यप्र
सिद्धकारणं सिध्यतीति न विरोधः॰ यथा॰ निशात्ययव्यंजिनिपंकजानामामोदमेदस्विनि गं
धवाहे॰ न मुंचतः कैतवकृद्धनिद्रावन्योन्यकंठग्रहणं युवानौ॰ यथासंख्यमेणैवक्रमिकाणां
समन्वयः॰ यथासंख्यं नामालंकारः॰ यथा॰ एकस्त्रिधा वससि चेतसि चित्रमत्र देव द्विषां च वि एम
दुषां च मृगीदृशां च॰ तापं च संमदरसं च रतिं च पुष्णन् शौर्योष्मणा च विनयेन च लीलया च॰ सामान्यं वा ६३
विशेषो वा तदन्येन समर्थ्यते॰ ज्ञेयः सोर्थांतरन्यासः साधर्म्येणेतरेण वा॰ अनुपपद्यमानतया सं

भाव्यमानस्यार्थस्य उपपादनार्थं यदर्थान्तरस्य न्यसनं उपपादकत्वेनोपन्यासः सोऽर्थान्तरन्यासः। त
त्र साधर्म्येण सामान्यं विशेषेण समर्थ्यते। यथा। निजदोषावृतमनसामतिसुंदरमेव भाति विपरी
तं। पश्यति पित्तोपहतः शशिशुभ्रं शंखमपि पीतं। साधर्म्येण विशेषः सामान्येन यथा। सुसितवसना
लंकारायामित्यादि। वैधर्म्येण द्वौ यथा। गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते। असंजातकिण
स्कंधः सुखं स्वपिति गौर्गली। एवमन्यावुदाहार्यौ। विरोधः सोऽविरोधेपि विरुद्धत्वेन यद्वचः। वस्तु
वृत्तेनाविरोधेपि विरुद्धयोरिव यदभिधानं स विरोधः। यथा। अभिनवनलिनीकिसलयमृणालव
लयादि दवदहनराशिः। सुभग कुरंगदृशोस्या विधिवशतस्त्वद्वियोगपविपाते। अस्य बहवो विषयाः
स्वयंलन्त्यतोन्नेतुसन्तव्याः। कार्यकारणभूतयोर्धर्मयोर्भिन्नदेशतया भासनरूपो संगत्याख्योऽलंकारो
विरोधपरंवानर्थतः। यथा। जस्सेव्व वणो तस्सेअ वेअणा भणइ तं जणो अलिअं। दंतक्खदं कवोले वहू

का·प्र· एवित्रग्रणासवन्नीणं·तथाऽसत्यपिकार्यस्यकारणरूपानुकारेयत्तयोर्गुणौक्रियेवमिथोविरुद्धतांव्र
६४ जनःसविषमालंकारोप्यत्रैवविरोधेनभूतः·यथा·सघःरस्पर्शमवाप्यचित्रंरणेरणेयस्यकृपा
६५ णलेखा·तमालनीलाम्बरदिंदुपांडुयशस्त्रिलोकाभरणंप्रसूते·तथासाधितंकेनाप्यपरेणत
दन्यथा·तदेवयद्विधीयेतसव्याघातइतिस्मृतः·इत्यनेनेलक्षितस्यव्याघातस्यविरोधएवांतर्भा
वः यथा·दृशादग्धंमनसिजंजीवयंतिदृशैवयाः·विरूपाक्षस्यजयिनीस्तास्तुवेवामलोचनाः·
स्वभावोक्तिस्तुडिंभादेःस्वक्रियारूपवर्णनं·स्वयोस्तदेकाश्रययोरूपंवर्णःसंस्थानंच·यथा·अंबा
करावलंबादविलंबमुत्थितस्खलच्चरणं·क्वणन्मणिमंजुरसनंमुत्कुजितदशनंहरिंवंदे·व्या राप
जस्तुतिर्मुखेनिंदास्तुतिर्वारूढिरन्यथा·व्याजेनस्तुतिर्व्याजरूपास्तुतिर्वामुखेप्रथमंततःरूढिः ६४
पर्यवसानं यथा·दातारंकृपणंमन्येमृतोप्यर्थंनमुंचति·अदातापुरुषस्त्यागीधनंसंत्यज्यगच्छति·

सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकं। सहार्थः। द्विवाचकं। सहार्थस्येत्यनेन समं सार्द्धमित्यादेरपि परिग्रहः।
एकमिति। एकप्रतियोगिकान्वयबोधकमपीत्यर्थः। द्विवाचकं। द्विप्रतियोगिकान्वयबोधकं। अयं भावः। विशेष
णपदानां विशेष्यान्वितस्वार्थबोधकत्वस्यौत्सर्गिकत्वं प्रकृते च सहाद्यव्ययपदसमभिव्याहारविशेषसहका
रेणापरसंबंधप्रतियोगिकान्वयप्रतिपादनमित्युभयप्रतियोगिकस्वार्थान्वयबोधकमिति। यत्रैकस्य प्रा
धान्येनान्यस्य गुणत्वेनैकधर्मान्वयित्वं तत्रायमलंकार इति पर्यवसितोऽर्थः। तेन चैत्रमैत्रौ सह प
चत इत्यत्र नातिप्रसंगः। समुच्चये द्वयोः प्राधान्येनान्वयोऽत्र त्वेकस्य। यथा। साकं दिवसनिशा
भिः श्वासा दीर्घा भवन्त्यघ। अपि तनुलतया सकृत नोऽजीवाशया दुर्बला जाता। विनोक्तिः सा विनान्येन यत्रा
न्यः सन्न नेतरः। क्वचिदशोभनः। क्वचिच्छोभनः। यथा। विना रजन्याकश्चंद्रो विना चंद्रेणका निशा। द्वि
तीयो यथा। विना नयेन राज्यश्रीः साध्वीयोपि द्विवापलं। परिहृतनिर्विनिमयोर्योर्यानां स्यात्समासमैः। प

का॰प्र॰ ६५ 65 रिष्टत्विरलंकारः॥ यथा॥ लास्यकमलवनानां दत्वा दत्तेव सौरभं पवनः॥ तान्यपि मुदं जनेभ्यो ददति न तोलत्वद
र्शनास्तु चैः॥ प्रमत्ताइव यद्भावा क्रियंते भूतभाविनः॥ तद्भाविकं उदा॰ आसीदंजनमत्रेति पश्यामि तव लो
चने॥ भावि भूषण संभारां साक्षात्कुर्वे तवाकृतिं॥ काव्यलिंगं हेतोर्वाक्यपदार्थता॥ यथा॥ अनिर्भिन्नगभी
रत्वादंतर्गूढघनव्यथः॥ पुटपाकप्रतीकाशो रामस्य करुणो रसः॥ अत्र पूर्वार्द्धवाक्यार्थः पुटपा
कप्रतीकाशत्वे हेतुः॥ पदार्थता यथा॥ तं संतः श्रोतुमर्हंति सदसद्व्यक्तिहेतवः॥ हेम्नः संलक्ष्यते ह्य
ग्नौ विशुद्धिः श्यामिकापि वा॥ अत्र सदसद्व्यक्तिहेतुत्वं श्रवणार्हत्वे हेतुः॥ पर्यायोक्तं विना वाच्यवाचकत्वेन
यद्वचः॥ वाच्यतावच्छेदकं विना प्रकारांतरेण वाच्यार्थस्य व्यंजनया यत्प्रतिपादनं तत्पर्यायेण भंग्यंतरेण एम
कथनात्पर्यायोक्तं॥ यथा॥ यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता॥ मदेनैरावणमुखे मानेन हृदये हरेः॥ ६५
अत्रैरावणशक्रौ मदमानविमुक्तौ जाताविति व्यंग्यमपि यद्देन प्रकारांतरेणाभ्यते तेन पदेनोव्यक्ते तदेव

व्यंग्यं यथा तु व्यंग्यं न तथा नोच्यते· उदात्तं वस्तुनः संपत्· संपत्समृद्धियोगः यथा मुक्ताः केलिविसूत्रहारग
लिताः संमार्जनीहृताः प्रातः प्रांगणसीम्नि मंथरचलद्बालांघ्रिलाक्षारुणाः दूराद्दाडिमबीजशंकित
धियः कर्षन्ति केलीशुका यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितं· महतां चोपलक्षणं· उपल
क्षणीयेर्थे· यथा· तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी· निवसन्बाहुसहायश्चका
र रक्षः क्षयं रामः· न चात्र वीरो रसस्तस्याङ्गत्वात्· तस्मिन्विहितानेकस्मिन्नत्रान्यनत्कारं न वेत्त्यस
मुच्चयो सौ· यथा· एष एवंविधमोन व मेघः स्रोपि वर्षति न रामविरामं· तत्र वेदविरतं शवशब्दाः पूर्ण
मघस्तनोः शान्तमन्द्राः· अत्र शतपूरणे नवमेघ एव कारणं· एतदुपरिवर्षणात् घकं· काव्यलिं
ग हेतुहेतुमद्भावमात्रं विवक्षितं· न पुनर्हेतूनां गुणप्रधानभावविंता· अत्र त्वेकस्यैव तत्कार्यकारित्वं
अन्ये तत्र सहायकं कुर्वन्तीति नतो भेदः· नाप्यसौ समाधिः· तत्र कारणानां काकतालीयत्व योगेना

का॰प॰ त्पर्यं अत्र तु न तथेति ततो भेदः॰ सत्वन्योयुगपधागुणक्रियाः॰ गुणेनेवक्रियेवगुणक्रियेवगुणक्रियाः॰
९९ यथा॰ नयनंतवरकंरमलिनाम्बरणेरयः॰ धुनोधिवासिंसहसानन्तुपेवमहघशः॰ एवं गुणक्रिययो
66 रपिबोध्यं॰ एकंक्रमेणानेकस्मिन्पर्यायः॰ एकंवस्तुक्रमेणानेकस्मिन्ननिधीयते यत्रस पर्यायः॰ य
था॰ नन्वाश्रयस्थितिरियंतवकालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा॰ प्रागर्णवस्यहृदयेवृषलक्ष्म
णोथकंठे कनावसम्प्रतिपुनःखलानां॰ अन्यस्ततोन्यथा॰ अनेकमेकस्मिन्नुच्यते यत्क्रमेण सोन्यः
पर्यायः॰ यथा॰ मधुरिमरुचिरंवचःखलानाममृतमहोप्रथमंपृथुव्यनक्ति॰ अथकथयतिमोहहे
तुमंतर्गतमिवहालाहलंविषंतदेव॰ अनुमानंतदुक्तंयत्साध्यसाधनयोर्वचः॰ यथा॰ यत्रेतालहरी एप
वलनांवलहशोव्यापारयंति ध्रुवंयत्रैवपतंतिसंततममीमर्मस्पृशोमार्गणाः॰ तच्चक्री ९९
त नवापसंधितशरप्रेंखत्करःक्रोधनोधावत्यग्रतएवशासनधरःसत्यंतदासांस्म

रः॥ अत्र वस्तुगत्या व्याप्यसत्त्वेपि कविप्रौढोक्त्यैव तथाभिधानमित्यलंकारत्वं॥ अन्यथा वह्नि
मान् धूमादित्यत्रापि तथा स्यात्॥ विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः॥ अर्थाद्विशेष्यस्य॥
यथा॥ महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्त्तयः॥ न संहतास्तस्य न भेदवृत्त
यः प्रियाणि वांछंत्यसुभिः समीहितुं॥ यद्यपि निरर्थकस्य दोषताभिधानान्निराकरणे
न सार्थकस्य स्वीकारः कृतः॥ तथाप्येकनिष्ठत्वेन बहूनां विशेषणानामुपन्यासे वैचित्र्यमि
त्यलंकारमध्ये गणितः॥ व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनं॥ निगूढमपि वस्तु
नो रूपं प्रभिन्नं प्रकाशितं केनापि व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः॥ न चैषापह्नुतिः प्रकृ
ताप्रस्तुतयोः साम्यस्येहासंभवात्॥ यथा॥ शैलेंद्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रो
म

का॰व
६७ मांवादिविसंघुलाखिलविधिव्यासंगभंगाकुलः। हा शैलेत्संतुहिनाचलस्य करयोरित्थं विवाहस्मि
तं शैलानां पुरमारमंगलगणैर्दृष्टो वताद्वः शिवः। किंचित्पृष्टमपृष्टं वा कथितं यत्प्रकल्पते। ता
(८) दृगन्यव्यपोहाय परिसंख्या तु सा स्मृता। प्रमाणांतरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयो
जनांतराभावात्सदृशवस्त्वंतरव्यवच्छेदाय पर्यवस्यति सा परिसंख्या। अत्र कथनं प्रश्नपूर्वकं तद
न्यथा च। यथा। किं ध्येयं विष्णुपदं किं वक्तव्यं हरेर्नाम। किं कार्यमार्यचरितैरमिलचित्तं पूजनं विष्णोः।
प्रश्नापूर्वकं। यथा। कौटिल्यं कचनिचये कर चरणाधरदलेषु रागस्ते। काठिन्यं कुचयुगले तरल
त्वं नयनयोर्वसति। यथोत्तरं चेत्पूर्वं पूर्वस्यार्थस्य हेतुता। तदा कारणमाला स्यात् उत्तरमुत्तरं प्रति यथो एका
त्तरं। यथा। जितेंद्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते। गुणप्रकर्षेण जनोनुरज्यते ६७
जनानुरागप्रभवा हि संपदः। अथ हेतोर्लक्षणं। उक्तिर्हेतुमता हेतुः प्राचीनैरनुमोदितः। हेतुर्हेतुना
मालंकारः। यथा। अविरलकमलविकासः सकलालिमदश्च कोकिलानंदः। ९

रम्योयमेत्तिसंबंदरिलोकोत्कंठाभरः कालः॥ यावस्तुनोगुणैर्संक्रैर्मिथोभूषणभूष्यतां अन्योन्य
मितितत्तज्ञेयं॥ अन्योन्यमन्योन्यनामालंकारः यथा॥ कंठस्यतस्यास्तनबंधुरस्यमुक्ताकलापस्य
॥ अन्योन्यशोभाजननाद्भव साधारणोभूषणभूष्यभावः॥ उत्तरश्रुतिमात्रतः॥ प्रश्नस्योन्नयनंय
त्रक्रियतेतत्रवासति॥ असकृद्यदसंभाव्यमुत्तरंस्यात्तदुत्तरं॥ यथा॥ गाम्भतामन्यतः पायत्तवेहवस
तिः कुतः॥ दोषायस्यादलंयेनवसतिः प्रोषितान्वये॥ भोगृहिणीवासंदेहो [illegible] तिवसत्तियायकस्य
यिहवनमनुनावाक्येनोन्नायते॥ तत्रवासतीति॥ प्रश्नेसतीत्यर्थः॥ असंभाव्यंलोकातिक्रांतगो
चरं उत्तरं प्रतिवचनं॥ यथा॥ काविसमादेवगई किंदुःतडं लणोगुणगग्गाही॥ किसोक्वस्स कलत्ते
किंदुग्गेसंखलोलो ॥ ४॥ अथ परिसंख्यायामन्यव्यपोह एव तात्पर्य॥ इहतुवाक्यएवविश्रांति

का.प. रिसनयोर्भेदः कुतोपिलक्षितः सूक्ष्मोप्यर्थोन्यस्मैप्रकाश्यते । धर्मेणकेनचिद्यत्र तत्सूक्ष्मंपरिचक्ष
६८ ते । कुतोप्याकारादिंगिताद्वायथा । वक्त्रस्यंदिस्वेदबिंदुप्रबंधैर्दृष्ट्वाभिन्नंकुंकुमंकापिकंठे । पुंस्त्वं
तन्व्याव्यंजयंतीवयस्या स्मित्वापाणौखड्गलेखांलिलेख । अत्राकृतिमालोक्यकयापिवित
र्कितंपुरुषायितमसिलेखालिखनेनवैदग्ध्यादभिव्यक्तिमुपनीतंपुंसामेवकृपाणपा
णितायोग्यत्वात् । इंगितोदाहरणंतु संकेतकालमनसमिसादिप्राग्युक्तंबोध्यं । उत्तरोत्तरमु
त्कर्षोभवेत्सारःपरावधिः । परःपर्यंतभावोऽवधिर्यस्य । धाराधिरोहितयातत्रैवोत्कर्षस्य रम
विश्रांतेः । यथाभोजनभूषणमबलाकरकलावंतितेषुमधः कदलीतदलंकारस्तदलं ६८
कारश्चशर्करासारः समाधिः सुकरंनामकारणांतरयोगतः । सुकरंसुकरत्वेन

नविवक्षितमित्यर्थः॰यथा॰मानमस्यानिराकर्त्तुंपादयोर्मेपतितः॰उपकारायदिष्ट्येदमुदीर्णं
घनगर्जितं॰समंसमनयायोगोयदिसंभावितःक्वचित॰अयमनर्थोगउचितइत्यध्यवासा
नंयेन्नदासमन्नामालंकारः इदंसद्योगेअसद्योगव॰ क्रमेणोदा॰निशाशशांकांशिव
यागिराशांश्रियाहरियोजयतः॰प्रतीतः॰विधेरपिरवारसिकः॰अयासः॰पैस्परंयोग्यस
मागमाय॰सुमहद्धिविज्ञमेतन्नस्तुचितरचनैविधिश्चतुरः॰आस्वाद्यंनिंबफलंतस्य
यश्चास्वादकःकाकः॰ क्वचिद्यदतिवैधर्म्यान्नश्लेषोघटनामियात्॰कर्त्तुःक्रियाफल
नैवानर्थःसविषामोद्विधा॰द्वयोरत्यंतविलक्षणतयायदनुपपद्यमानतयैवयोगःअनी
यतेयाश्चकिंचिदारभमाणःकर्त्ताक्रियायाःप्रणाशात्नकेवलमभीष्टतफलंनम

का॰प॰ ते॰ यावदर्थार्थितमनर्घमासादयति सद्विरूपो विषमः क्रमेणोदाहरणं॰ शिरीषादपि मृद्वंगी क्वे
६९ यमायातलोचना॰ अयं क्व च कुकूलाग्निकर्कशो मदनानलः॰ सिंहिकासुतसंत्रस्तः श
69 शः शीतांशुमाश्रितः॰ जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः॰ महतोर्यन्महीयांसाव
श्रिताश्रययोः क्रमात्॰ आश्रयाश्रयिणौ स्यातां तनुत्वेप्यधिकं तु तत्॰ आश्रिताश्रय
योर्महतोरपि विषयेत्वदपेक्षया तनुत्वेप्याश्रयाश्रयिणोः प्रस्तुतवस्तुप्रकर्षवि
वक्षयाय यथाक्रमं यदाधिक्यं तज्जनः तदिदं द्विविधमधिकं॰ क्रमेणोदाहरणं॰ अहो वि एम
शालं भूपाल भुवनत्रितयोदरं॰ माति मातुमशक्योपि यशोराशिर्यदत्र ते॰ युगांतका ६९
लप्रतिसंहृतात्मनो जगंति यस्यां सविकाशमासत॰ तनौ ममुस्तत्र न कैटभ

द्विषस्तपोधनाभ्यागमसंभवामुदः प्रतिपक्षमशक्तेन प्रतिकर्तुंतिरस्क्रियाः यान्तदाय
स्यतत्स्यैप्रत्यनीकंतदुच्यते प्रतिपक्षंतिरस्कर्तुमित्यर्थः तत्स्यैप्रतिपक्ष
स्तत्वैः यथा त्वंविनिर्जितमनोभवरूपः साच सुंदर भवत्यनुरक्ता पंचभिर्युगप
देवशरैस्तांताडयत्यनुशयादिव कामः विधीयते यद्बलवत्सजातीयोपलंभनैः
तिरस्करणमन्यस्य तन्मीलितमिति स्मृतं तयाबलवत्सजातीयग्रहण
मेवाभिभवस्तदेवामीलितमितिर्निर्गन्तव्यं यथा मल्लिकामाल्यभारिण्यः सर्वांगी
णार्द्रचन्दनाः क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसा[illegible]रिकाः स्थाप्यतेऽ
पोह्यते वापि यथापूर्वं परंपरं विशेषणतया वस्तुयत्र सैकावली द्विधा पूर्वप

का॰प्र॰
७०
70

र्वस्पतिर्यत्रोऽत्ररोऽत्ररस्यवस्तुनोवीप्स्याविशेषणभावेनस्थापनंनिषेधोवासाद्विधै
कावली॰ क्रमेणोदा॰ पुराणियस्यांसवरांगनानिवरांगनारूपपरिस्फुतांग्य
ःरूपंसमुन्मीलितसहितासमस्तंविलासाः [illegible]कुस्तुमायुधस्य॰ ननन्दलंयत्र
स्वचारुपंकजंनपंकजंतद्यदलीनषट्पदं॰ नषट्पदोसौनजुगुंजयःकलंनगुंजि
तंतन्नजहारयन्मनः॰ पूर्वत्रपुराणांवरांगनास्तासामंगविशेषणमुखेनरूपं
तिस्यविलासास्तेषामात्वमसुनाक्रमेणविशेषणंविधीयते॰ उत्तरत्रनिषेधेप्ये राम
वमेवयोज्यं॰ यथानुनवमर्थस्पृष्टेनस्पृशेस्मृतिनिः॰ स्मरणं॰ यथा॰ निम्नना ७०
भिकुहरेषुयदंभ[illegible]नः॰ प्लाविनंमृगदृशांलहरीभिः॰ तद्भवैःकुहकुहैःस्मरनार्यं

ःस्मारिताःस्तरतकंठरूतानां·भ्रान्तिमानन्यसंवित्तत्तुल्यदर्शने·न दिस्यन्यदिस
व्याकरणेकेनिर्दिश्यते·अन्यसंविदिस्यन्यस्यान्यतयासंवेदनंव्याधिकरणप्र
कारंज्ञानंभ्रान्तिमानित्यर्थः·तथायथानुभूयमानारोपरूपस्यसामान्यात्वंका
रस्याप्यवैयात्तन्मीवः·यथा·वेत्रत्वत्तुल्यरूपांवध्नांकरणीयतोगं ऽतत्वाग
तानि·स्तंगाःसहेत्वंयदिनापतिष्यन्कोवेदयिष्यावावंपकानि·अत्रनिमित्तं
तरजनितापितानात्वप्रतितीः·प्रथमप्रतीतमभेदंनखुदसितुमुत्सहते·सा
क्षात्कारित्वमेसाक्षात्कारिविशेषदर्शनेविरोधातिन्यायात्·नवेदरूपकंप्र
थमातिशयोक्तिर्वा·तयोराहार्यारोपरूपत्वात्तत्रस्यत्वगाहार्यत्वात्·यथा·धा

का॰प॰ ७१ 71 मथर्षिनिवमैदंवंमहः प्रेक्ष्यसंभ्रमवशात् साध्वसः॰ वीतिहोत्रइन्निगेहिनास्तनावायक
र्षकलत्रशीघियाध्वगः॰ विगमसिद्धमाधारमाघेयास्यव्यवस्थितिः॰ एकात्मा
युगपद्वतिरेकस्यानेकस्यानेकगोचरः॰ अन्यच्चकुर्वतः कार्यमेशाक्यस्या
न्यवस्तुनः॰ तथोवकरणंयेनिविशेषस्त्रिविधः॰ स्मृतः॰ एकात्माएकस्वभाव
ः॰ तथावैकामेववस्तुएकेनस्वभावः तथावैकमेववस्तुएकेनस्वभावेनयुग
पदनेकत्रवर्तनइत्यर्थः॰ तथैवतिः॰ तेनैवप्रकारेणेत्यर्थः॰ क्रमेणोदा॰दि [illegible] एम
वमप्युपयातानामाकाल्यमनल्पगुणगणयेषान्नमपंति [illegible] जगंत्निगिरः कथ ७१
मिवकवयोनानिवंद्याः सावसइत्युक्तहि अयएसद्विअयछास्तु साअवअएस्सु

अस्मारिसाणस्कंदरञ्ज वा संकल्पपावाणं॰ स्फुरदङ्कुनरूपमु अनापज्वलनं त्वांसज
तानवद्यविद्यं॰ विधिनासस्रजेन वामनोमर्म्के विसत्यं सविनाश्र्ह स्पनिश्च॰
एवं हरगोपियथा॰ गृहिणी सचिवः सखी मिथ इत्यादि स्वमुत्सृज्य गुणांयोगाद्दत्य
ज्यत्नागुण स्पयत्न॰ वस्कन्तहुणनामेत्तिभस्पते सत्तुनकुणः॰ स्वमुस्तृज्येनिः छ
त्र स्वगुणनिरस्कार एव स्वगुणत्यागः यथा॰ विनिन्नवर्णीगरुडाध्वजेनस्त
र्यस्पर्ध्यापरिनः स्फु [illegible]
रं त्या॰ रत्नैः पुनर्यत्र रुचं रुचा स्वामानि न्यिर वंशाकरीरनीलैः॰ तद्रूपानन्तु हारेय

का.प्र. ७२ 72 दस्य तत्स्पादनुद्गुणः अस्यापह्नुतस्यानुद्धारः अपह्नुतं यथा. गांगमंबुसितमंबु
यामुनेकज्जलाभमुभयत्र मज्जतः राजहंस तव सैव शुभ्रता चीयते न च न चा
पचीयते. सेष्टा संसृष्टिरेतेषां भेदेनैकतया स्थितिः एतेषामलंकाराणां भेदे
नान्योन्यनिरपेक्षतया शब्दभाग एवार्थभाग एव उभयत्र वा यद्यवस्थाने सा
संसृष्टिः तत्र शब्दालंकारसंसृष्टिर्यथा. तारतारतरैरित्यादि अर्थालंका
रसंसृष्टिर्यथा. लिंपतीव तमोंगानि वर्षतीवांजनं नभः असत्पुरुषसेवेव रम
दृष्टिर्विफलतां गता. पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोज ७२
यतः परत्र तु तथाविधे उत्प्रेक्षोपमे शब्दार्थालंकारयोः संसृष्टिर्यथा. हिंदोलि

केयमिंदोः कलिकेत्यादौ अनुप्रासो रूपकं च संसृष्टिं प्रयोजयतः॥ अविश्रांतिजुषा
मात्मन्यंगांगित्वं तु संकरः॥ तेषामलंकाराणामात्मनि आत्ममात्रे अविश्रांतिजुषो
चमत्कारे अन्यायेक्षणां अंगांगित्वमनुग्राह्यानुग्राहकत्वं तद्रूपः संकर इत्यर्थ
ः इतरविज्ञानीयाः सहकारेण चमत्कारकारित्वं विश्रांतिः॥ एतेन संसृष्टेर्भेदोद
र्शितः॥ यथा॥ शोणं बिंबोष्ठकांत्या त्वदरिमृगदृशामित्वरीणामरण्ये राजन्गुंजा
फलानां स्रज इति शबरा नैव हारं हरंति॥ अत्र तद्गुणमपेक्ष्य भ्रांतिमतः प्रादुर्भा
वं न ह्याश्रयेण च न तद्गुणः प्रभृत चमत्कारनिमित्तमित्येतयोरंगांगिभावः॥ एवं रू
पश्च संकरः शब्दालंकारयोरपि दृश्यते॥ उदाहरणं स्वयमूह्यं॥ एकस्य च ग्रहे न्यायदौ

का॰प्र॰ पाभावादनिश्चयः एकस्य एकतरस्येत्यर्थः न्यायदोषौ साधकबाधकप्रमाणे तयोर्वैक
७३ च काव्ये द्वयोर्बहूनां वालंकाराणां सत्वप्रसंगे संभवत्स्वप्येकतरस्यापि परिग्रहे साधकबा
73 धकप्रमाणाभावात्संशयः संदेहसंकर इत्यर्थः यथा नयनानंददायी देर्बिंबमेतत्प्रसी
दति अधुनापि निरुद्धाशमविशीर्णमिदं तमः अत्र किं कामस्योद्दीपकः कालो वर्ण्यन
उत भंग्यंतरेणकथनात्पर्यायोक्तमुत तदाननस्येंदुबिंबतयाऽध्यवसानादतिशयो
क्तिः किमेतदिति वक्तुं निर्दिश्य तद्रूपारोपणाद्रूपकमिदमित्यादि बहूनां संशयाद
यमेव संकरः यत्र पुनः सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिरित्यादौ रूप
हासद्युतिर्वक्त्र एव संभवतीति उपमायाः संभवो न रूपकस्य तथा पदांबुजं नयत्य

स्यामंजुमंजीरसिंजितमित्यत्र मंजीरसिंजितमंबुजेनास्तीति रूपकस्य बाधः उपमाय
स्तु संभवइति न तत्र संदेहसंकरः एवमन्यत्रापि भाव्यं· स्फुटमेकत्र विषये शब्दार्था
लंकारनिद्वयं· व्यवस्थितं च· एकस्मिन्नेव पदे स्पष्टतया यदुभावपि शब्दार्थालंकारौ
व्यवस्थां न जातः सोप्यपरः यथा· स्पष्टोल्लसत्किरणकेसरसूर्यबिंबविस्तीर्णक
र्णिकमथो दिवसारविंदं· श्लिष्टदिग्दलकलापमुखावतारबद्धांधकारमधुपावलि
संकुचाय· अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ· तेनासौ त्रिरूपः परिकीर्तितः तद
यमनुग्राह्यानुग्राहकतया संदेहेनैकपदप्रतिपाद्यतया च व्यवस्थितत्वात् त्रिरू
पतया संकरः कथितः· अत्रेदमवधातव्यं· यत्र शब्दाः परिवृत्तिं सहंते सअर्थस्यालंकारः· यत्र नोन

का०प्र० ७४ यास्तोर्थालंकारः यत्रकुचे वनशब्दाः परिहन्तिं सहंते केयिष्ठन सहंते स उभयालंकारः यथ
पुनरुक्तवदाभासः श्लिष्टपरंपरितरूपकं च॥ अथैषामलंकाराणां दोषाः॥ अनुप्रास
74 स्य प्रसिद्ध्यभावो वैफल्यं हानिविरोध इति त्रयो दोषाः॥ क्रमेण यथा॥ अर्चनेन तव
दिव्यववसास्यंदनेन पदमैंदु मलब्धं ति॥ वंदनेन तव शैलनंदने नंदने वजनए पनंद
ति॥ अत्रार्चनादिना ऐंदुफललाभादि फलमनुप्रासानुरोधेनैव प्रतिपादितः॥ न तु प्र
रागादिषु तथा प्रसिद्धिरिति प्रसिद्धिविरोधः॥ उर्व्यसावत्र तर्वाली मर्वन्ते यार्वचास्य
ति॥ नात्र र्ज्ज शक्यते गंतुं शिरो नमयतन्मनाक्॥ अत्र त्वनुप्रासेनैव विविक्ष्यमाणेन राम
किंचिदपि चारुत्वं प्रतीयत इत्यनुप्रासस्यावैफल्यं॥ अकुंठोत्कंठया पूर्णमित्यादौ ७४
शृंगारोऽसौ हानिर्विरुद्धं ति हन्ति विरोधः॥ एवं यमकस्य पादत्रयगतत्वेन यमनं दोषः॥

यथा॰ सद्दानवरिपुंशंभुं सदालापैर्विविक्तधीः॰ सदाध्यायज्ञनार्थः॰ स्यान्मदाहंकारव
र्जितः उपमायाउपमानस्यजातिपरिमाणगतंन्यूनत्वमधिकत्वंवदोषः॰ तथास
धारणधर्माश्रितमधिकत्वन्यूनत्वंवदोषः॰ क्रमेणोदाहरणानि॰ यांउत्लेरिवसुषाभि
ःसाहसंपरमंदत्तं॰ वह्निस्फुलिंगइवभानुरयंवकास्ति॰ अयंपद्मासनासीनश्चक्रके
वाकोविराजते॰ युगादौभगवान्ब्रह्माविनिर्मित्सुरिवप्रजाः॰ अत्रास्यंतोत्कृष्टस्यो
पमानीकरणमपकृष्टस्योपमेयस्योपहासएवपर्यवस्यति। दोषतानिधानत्य
धिकत्वन्निस्यमितिभावनीयं॰ पातालइवनाभिस्तनौक्षितिधरोपमौ॰ वेणीदंडःसु
नरयंकालिंदीपातसन्निभः॰ अत्रवंडालादिभिरुपमानैःप्रस्तुर्थीस्यंतंकदर्थितइति

का॰प॰ दुष्टत्वं॰समुन्निलींद्विनोमौञ्ज्याञ्जन्नालिनपठंवहन्॰विरेजेनीलजीमूतमागाश्लिष्टइवां
७५ शुमान्॰ अत्रोपमानस्यामौञ्जीस्थानीयस्तडिद्व्लक्षणोधर्मः केनापिपदेननप्रति
75 पादितइतिन्यूनत्वं॰ सपीतवासाःप्रगृहीतशार्ङ्गोमनोज्ञभीमंवपुरापकृष्णः॰शतह्रदेन्द्रायुध
वाननिशायांसंसृज्यमानःशशिनेवमेघः॰ अत्रोपमेयस्यशंखादेरनिर्देशात्कृषिनोग्रहणम
तिरिच्यतइति॰ तथोपमायामुपमानोपमेययोर्लिंगवचनभेदोदोषः॰ साधारणधर्मस्यैक
मात्रगतत्वेनप्रतीतेः॰ यथा॰ चिंतारत्नमिवच्युतोसिकरतोधिग्मंदभाग्यस्यमे॰ यथावा॰ सक्तवो
भक्षिताराजन्शुद्धाःकुलवधूरिव॰ यत्रनानात्वेपिलिंगवचनयोःसाधारणधर्मोनैकमा एभ ७५
त्रगामीभवतितत्रनायंदोषः॰ यथा॰ गुणैरनर्घ्यैःप्रथितोरत्नैरिवमहार्णवः॰ तथान्तद्वेषोऽस

दृश्शोन्याभिः स्त्रीभिर्मधुकरताभृतः दधते स्म परां शोभां तदीया विभ्रमा इव· तथोपमायां काल
पुरुषविध्यादिभेदा अपि दोषाः· उद्देश्यप्रतीतेरस्खलितरूपतया विश्रान्तेरभावात्· यथा
अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती· पश्चिमा यामिनीयामात् प्रसादमिव चेतना· अ
चेतना प्रसादमाप्नोति न पुनरापेति कालभेदः· तथा· विभ्राजसे मकरकेतनमर्चयन्ती वा
लप्रवालविटपप्रभवा लतेव· अत्र लता विभ्राजते न तु विभ्राजसे इति पुरुषभेदः· तथा· गंगे
व प्रवहतु सदैव कीर्तिरित्यादौ गंगा प्रवहति न तु प्रवहतु इत्यप्रवृत्तप्रवृत्ता तन्नो विधिभेदः·
एवमुपमायामसादृश्यमसंभवश्च दोषः· स्फुटमुदाहरणद्वयं· उत्प्रेक्षायामपि संभावनं ध्रु
वादय एव शब्दा वक्तुं प्रभवन्ति न तु यथाशब्दोऽपि तत्र तदुपादानं दोषः· यथा· उदयो दीर्घिकागर्भा
न्मुकुलं मेचकोत्पलं· नारीलोचनचातुर्यशंकासंकुचितं यथा· एवं साधारणविशेषणवशा

का॰प॰ देवसमासोक्तिरनुक्तमुपमानविशेषं प्रकाशयतीति तस्यात्र पुनरुपादाने दोषः। यथा। स्पृश
७९ ति तिग्मरुचौ ककुभः करैर्दयितयेव विजृंभितनापया। अननुमानपरिग्रहया स्थितं रुचिरया
76 दिवसश्रिया। अत्र तिग्मरुचेः ककुभां च। यथा सदृशविशेषणबलेन व्यक्ति विशेषपरिग्रहे एव
नायकतयाभिव्यक्तिः तथा ग्रीष्मदिवसश्रियोपि प्रतिनायकात्वं भवितुमर्हतीति किं दयितयेति स्व
शब्दोपादानेन। एवमप्रस्तुतप्रशंसायामपि उपमेयमनयैव रीत्या प्रतीतं न पुनः प्रयोगेण
कदर्थनं नेयं उदाहरणं तु स्वयं बोध्यं। एवमन्यदप्यूह्यं। एतान् दोषाननुक्तदोषेषु केचिदंतर्भावयं
त्यत्र नास्माकमहह विलेशारस्फ परम्पत। उदंचन्नकौघस्नपितमतिरेकांतरक्तं भगं भविष्णोः राम
षीविष्णोश्चरणमधुलुंटाकसत्कपः अवंधं निर्वंधादिममतिनरां युक्तिलहरीपरीरंभारंभं जडभं ७९
रतनामा भणितवान्॥१॥ ग्रन्थ ४०

का० प० ७७ न्वरप्रबलकर्कशतर्कवर्वरीरत्नच्छटाविविधविभ्रमगुंफितश्रीः कंठेसतांलुठतुहारइवैषहा
रीश्रीवत्सलांछनकवेर्वचसांविलासः २ येनामंडिकणादगौतममतंसांख्यंचसंन्यो मितंमीमां
सातुलकीर्तनेवसकलंपातंजलं वेदांतार्थविचारपारगमनेर्ब्रह्मैकलग्नस्थि
तेः श्रीवत्सस्यदृशः स्तवपरिणतिस्तस्मैयशुन्मीलति ॥३॥ इतिश्रीवत्सलांछन
महाचार्यविरचितायांकाव्यपरीक्षायांपंचमउल्लासः ॥ ॥ शाकेरामाभिबाणेंदु
१५३३ मितेविश्वविधास्तिथौ ५ ॥ शनौगणेशदेवज्ञः काश्यामिदमलीलिख राम ७७
त् ॥ छ ॥ श्रीरस्तु ॥ ॥ शुभमस्तु ॥ ॥ श्रीगुरवे उपर्णामस्तु ॥ ॥ श्रीगुरुर्जयति
॥ संवत् १६[illegible] समयेमाघवदी २ श्रीराम ॥ राम ॥ राम ॥ राम ॥ राम ॥ छ ॥